# वेदविषयस्य शिक्षणस्रोतःसामग्री



नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

# वेदविषयस्य शिक्षणस्रोतःसामग्री

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

प्रकाशकः

**नेपालसर्वकारः**

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

**सानोठिमी–भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति। लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०८२

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तक-स्रोतसामग्री-विकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति । विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽद्यत्वे आवश्यको दृश्यते । अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितान् विविधान् पाठ्यक्रमाननुसृत्य सामग्रीमिदं निर्मितं वर्तते । शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति । शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य विद्यालयस्तरस्य (कक्षा ६-१०) वेदविषयस्य शिक्षणस्रोतसामग्रीरूपेण पुस्तकमिदं विकसितं वर्तते ।

इदं पुस्तकं प्रा.डा. ऋषिरामः रेग्मी, प्रा.डा. मुकुन्दप्रसादः लामिछाने, उपप्रा. मनोजः घिमिरे, द्रोणः दाहाल, पुरुषोत्तमः घिमिरे- प्रभृतीनां महानुभावानां कार्यदलेन संयोजितं सम्पादितञ्चास्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः युवराजः पौडेल, प्रा.डा. माधवशरण उपाध्यायः, प्रा.डा. आनन्दप्रसादः घिमिरे, प्रा.डा. ऋषिरामः पौडेल, शिवराजः लामिछाने, निश्चलः अधिकारी, टुकराजः अधिकारी, राजुः श्रेष्ठ-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य रूपसज्जा भक्तबहादुरः कार्की इत्याख्येन महानुभावेन कृतमस्ति ।

पुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राश्च पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपभोगेन अध्यापयितुमध्येतुं प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

# प्रास्ताविकम्

वेदः सर्वस्यास्य ब्रह्माण्डस्य प्राचीनतमो ग्रन्थः अस्ति। अयं सकलानां ज्ञानविज्ञानानामाकरः। वेद एव प्राचीनान् धर्मसमाजसभ्यतासंस्कृतिव्यवहारादीन् विषयान् बोधयितुं क्षमते। आर्यसभ्यता तु वेदमेव आधारीकृत्य विराजिताऽस्ति। **धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः**, इत्युदीरयन् शास्त्रेषु शब्दराश्यात्मकस्य एतस्य परमप्रामाण्यं स्वीकृतमस्ति। वेदानुकूलम् आचरणं धर्मत्वेन, तद्विपरीतञ्चाधर्मत्वेन स्वीकरणाद् वेदस्य सर्वोच्चता सिद्ध्यति।

ज्ञानार्थकाद् विद्–धातोः घञ्–प्रत्ययेन वेदशब्दस्य निष्पत्तिर्जायते। शब्दः अयं ज्ञानस्यापरपर्यायः। यः कोऽपि सांसारिकः प्राणी ज्ञानं प्रति समाकृष्टो भवत्येव। शास्त्रेषु तत्त्वचिन्तकैः ज्ञानस्य महत्ता प्रतिपादिता विद्यते यत् – **ऋते ज्ञानान्न मुक्तिः** इति। शाश्वतस्य ज्ञानस्य कृते वेदस्य अङ्गीकरणम् अपरिहार्यं भवति। अस्मत्पूर्वजैः ज्ञानैकपक्षपातिभिः तपोमूर्तिभिः महर्षिभिः स्वतपसा साक्षात्कृत्य वेदज्ञानम् अस्मभ्यं प्रदत्तम् अस्ति। मानवाश्रितानां भ्रमप्रमादविप्रलिप्सादीनां दोषाणाम् अभावात्, परमात्मनो निःश्वासरूपाद् अपौरुषेयशब्दसमूहाच्च वेदः सर्वथा समादृतो विद्यते विश्वस्मिन् जगति। धर्मार्थकाममोक्षरूपाणां पुरुषार्थानां सिद्धेः उपायबोधको ग्रन्थो वेदो धर्मब्रह्मणोः प्रतिपादकः। वेदेषु कर्मणामुपासनानां ज्ञानानाञ्च विवेचनं प्राप्यते। प्रत्यक्षेणानुमानेन वा प्रमाणेन दुर्बोध्यस्य अज्ञेयस्य चोपायस्य बोधो वेदेनैव सम्भवति। इदमेवास्ति वेदस्य वेदत्वम्।

वेदोत्पत्तिविषये मतैक्यं नास्ति। पाश्चात्त्या विद्वांसो वेदस्य कालं निर्धारयितुं कृतप्रयत्नाः सन्ति। पौरत्यास्तु वेदं नित्यत्वेन अपौरुषेयत्वेन च स्वीकुर्वन्ति। **अनन्ता वै वेदाः**, इत्युद्घोषयन् शास्त्रेषु वेदस्यादिरन्तश्च नैव स्वीकृतो दृश्यते। यथा परमात्मा अनादिरनन्तश्चास्ति, तथैव परमात्मनो निःश्वासरूपत्वाद् वेदस्यापि आद्यन्तौ नेति तेषाम् अभिमतम्। सृष्ट्यादौ परमात्मा ब्रह्माणं सृष्ट्वा तस्य हृदये वेदज्ञानं प्रादात्, तदनन्तरं ब्रह्मपरम्परया प्राप्तं शब्दराश्यात्मकं

वेदं महर्षयः तपोबलेन साक्षात्कृतवन्तः। ते महर्षयो असाक्षात्कृतेभ्य ऋषिभ्य उपदेशेन वेदमन्त्रान् प्रददुः। एवमेव शिष्यप्रशिष्यतच्छिष्यक्रमेण उपदेशपरम्परया वेदवृक्षः सहस्रशाखासु विस्तृतो दृश्यते।

वेदग्रहणे गुरुमुखोच्चारणम् अनुसृत्य शिष्यैस्तदनुकूलम् उच्चारणं विधीयते। गुरुमुखाद् अनुश्रूयत इति अनुश्रवो वेदः। गुरुमुखात्–श्रुत्वा ग्रहणेन च वेदस्यापरं नाम श्रुतिरिति। वेदे नियतपादाक्षरावसाना पद्यात्मकाः, अनियतपादाक्षरावसाना गद्यात्मकाः, गीतिरूपा गानात्मकाश्चेति त्रिप्रकारका मन्त्रा विद्यन्ते, अतस्त्रयीति तस्य संज्ञा। कलियुगे जनिष्यमाणान् मन्दमतीन्, अल्पायुष्काँश्च मनुष्यान् विचार्य वेदमन्त्राणां यज्ञियप्रयोगाधारेण द्वापरान्ते महर्षिणा कृष्णद्वैपायनेन एको वेदश्चतुर्धा विभक्तः। ऋग्यजुःसामाथर्वाख्येन प्रतिष्ठितान् ताँश्चतुरो वेदान् वेदव्यासः क्रमेण पैल–वैशम्पायन–जैमिनि–सुमन्तुनामभ्यः शिष्येभ्यः प्रददौ। ततस्ते व्यासशिष्याः स्वशिष्येभ्यो ददुः। एवं प्रकारेण शिष्यपरम्परया वेदो नैकशाखासु विस्तृतः। महर्षिणा पतञ्जलिना स्वकीये महाभाष्ये ऋग्वेदस्य एकविंशतिः, शुक्लयजुर्वेदस्य पञ्चदश, कृष्णयजुर्वेदस्य षडशीतिः, सामवेदस्य सहस्रम्, अथर्ववेदस्य च नव, एवं संहत्य ११३१ सङ्ख्यकानां शाखानामुल्लेखो विहितोऽस्ति। तेषु काश्चन शाखा एव इदानीम् उपलभ्यन्ते। वेदशाखा नावयववाचिन्यः, अपितु ताः प्रत्येकं ब्राह्मणारण्यकोपनिषद्भिः अङ्गोपाङ्गैश्च पूर्णा विद्यन्ते। कुलपरम्परया प्राप्तायाः स्वशाखाया अध्ययनं द्विजातिभिः अनिवार्यत्वेन करणीयम् इति शास्त्रेषूल्लिखितं दृश्यते।

मन्त्रब्राह्मणयोर्वेदनामधेयम्। वेदशब्देन मन्त्रभागस्य ब्राह्मणभागस्य चोभयोः ग्रहणं भवति। तत्र मन्त्रभागे मन्त्रसमुदायरूपा ऋग्यजुःसामाथर्वाख्याः संहितापदवाच्या ग्रन्था विद्यन्ते। ब्राह्मणभागस्तु संहितागतानां मन्त्राणामेव व्याख्यानं विदधाति। ब्राह्मणभागे ब्राह्मणानि, आरण्यकानि, उपनिषदश्च परिगण्यन्ते। तत्र ब्राह्मणग्रन्थेषु गृहस्थानामुपयोगिनाम् अग्निष्टोमादियज्ञानां प्रतिपादनं विहितम् अस्ति। तथैव आरण्यकग्रन्थेषु वानप्रस्थाश्रमिणां कृते ईश्वरोपासनाया यज्ञयागादीनाञ्च दार्शनिकं विवेचनम्, उपनिषद्ग्रन्थेषु च संन्यस्तानामुपयोगि ज्ञानपरकं चिन्तनम् उपलभ्यते।

दुरूहस्य वैदिकज्ञानराशेर्ज्ञानाय कृपालवो अस्मदृषिप्रवरा अङ्गशास्त्राणाम् उपदेशं विहितवन्तः। शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दःशास्त्रम्, ज्यौतिषञ्चेति

षड् वेदाङ्गानि प्रसिद्धिङ्गतानि सन्ति। तेषु शिक्षाशास्त्राणि अकारादिवर्णानाम् उदात्तादिस्वरादीनाञ्च उच्चारणविधिं प्रतिपादयन्ति। कल्पशास्त्रान्तर्गतानि श्रौतसूत्राणि, गृह्यसूत्राणि, धर्मसूत्राणि, शुल्बसूत्राणि च वेदविहितानां यज्ञकर्मणां निरूपणं विदधति। तथैव व्याकरणशास्त्रं शब्दान् व्युत्पादयति, निरुक्तशास्त्रं दुरूहानां वैदिकशब्दानां निर्वचनं करोति, छन्दःशास्त्रं गायत्र्यादीनां वैदिकच्छन्दसां निरूपणं विदधाति, कालविज्ञापकं ज्यौतिषशास्त्रञ्च यज्ञयागादीनां मुहूर्तं निरूपयति। वेदार्थज्ञानाय तेषाम् अङ्गग्रन्थानाम् अध्ययनम् आवश्यकं भवति। एतदतिरिक्तानि प्रतिपदानुपद–च्छन्दोभाषा–मीमांसान्याय–तर्कशास्त्र–धर्मशास्त्राख्यानि वेदोपाङ्गानि, उपवेदाः, स्मृतिशास्त्राणि, पुराणानि, रामायणमहाभारतादीनि शास्त्राण्यपि वेदमेव उपकुर्वन्ति। एवं प्रकारेण प्रसृतं वैदिकसाहित्यं विशालकायं जातमस्ति।

शास्त्रेषु अर्थज्ञानपूर्वकं विहितस्य स्वाध्यायस्यैव फलवत्त्वम् अनेकत्र प्रतिपादितम् अस्ति। वेदाः सार्थयुक्ता अध्येतव्या भवन्ति। मन्त्रोच्चारणमात्रेण स्वाध्यायो न सम्पद्यते। यथा अग्निरहिते होमकुण्डे प्रक्षिप्तं शुष्कमपि काष्ठं नैव ज्वलति, तथैव अर्थज्ञानं विनोच्चरितो मन्त्रः कदाचिदपि ईप्सितमर्थं न प्रकाशयति –

**यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्।।**

यो वेदपाठं करोति परम् अर्थतत्त्वं न वेत्ति, अर्थज्ञानाय च न प्रयतते, तस्य सम्पूर्णम् अध्ययनं निरर्थकं जायते, स भारवाहकः स्थाणुरेव मन्यते। यश्च अर्थज्ञानपूर्वकं वेदाध्ययनं करोति, स सर्वपापैः विनिर्मुक्तो भूत्वा सकल सुखं यद्वा स्वर्गं भुङ्क्ते। उक्तमपि यत् निरुक्तशास्त्रे –

**स्थाणुरयं भारहारः किलाभूद्, अधीत्य वेदं न विजानाति योऽर्थम्।**

**योऽर्थज्ञ इत्सकलं भद्रमश्नुते, नाकमेति ज्ञानविधूतपाप्मा।।**

अनर्थज्ञो जनः वाक्तत्त्वस्य दर्शनं कर्तुमसमर्थो भवति। अर्थज्ञस्तु वाग्देवीं साक्षात्कर्तुं शक्नोति। यथा पतिपरायणा स्त्री लज्जाशोकभयादिभिः रहिता सर्वस्वं प्रकटयति समर्पयति

च, तथैव अर्थतत्त्वस्य जिज्ञासूनामग्रे वाक्तत्त्वस्य सकलं निगूढं तत्त्वं प्रसरति। उक्तञ्च यद् ऋग्वेदे –

**उत त्वः पश्यन्न ददर्श वाचमुतत्वः श्रृण्वन्न श्रृणोत्येनाम्।**

**उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः।।**

वैदिकमन्त्राणाम् अर्थो गूढोऽस्ति। वेदार्थज्ञानं नैव सुकरम्। ऋग्वेदे देवतानां स्तुतिपरकाः, यजुर्वेदे यज्ञकर्मणां प्रतिपादकाः, सामवेदे गानात्मकाः, अथर्ववेदे चाभिचारप्रधाना आधुनिकविषयप्रतिपादका अपि मन्त्रा विद्यन्ते। दुरूहस्य वैदिकशब्दराशेर्ज्ञानाय अङ्गोपाङ्गानां शास्त्राणां ज्ञानम् आवश्यकं भवति। तथैव विविधकर्मसु विनियुक्तानां मन्त्राणाम् ऋषिच्छन्दोदेवतादिप्रकाशकस्य विनियोगस्यापि ज्ञानम् अपरिहार्यं भवति। ब्राह्मणग्रन्थेषु समुल्लिखितम् अस्ति यत् –

**यो ह वाऽविदितार्षेयच्छन्दोदैवतविनियोगेन ब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति, स स्थाणुं वर्च्छति, गर्तं वा पतति, प्रमीयते वा पापीयान् भवति, यातयामान्यस्य छन्दांसि भवन्ति।**

वेदस्य व्याकरणं लौकिकव्याकरणाद् भिन्नम् अस्ति। शब्दा अपि बाहुल्येन भिन्नाः सन्ति। स्वरभेदे अर्थभेदो भवति। प्रकरणभेदेऽपि अर्थभेदो जायते। अतो मन्त्राणाम् अयमेवार्थ इति निर्णयः सुदुष्कर एव भवति। तथापि अर्थावबोधस्य अपरिहार्यत्वाद् ऋषिप्रदर्शितेन मार्गेण आर्षदृष्ट्या मन्त्रार्थाः बोद्धव्या भवन्ति। तस्मात् कारणात् प्रमाणभूतानां महीधरादीनाम् आचार्याणां भाष्याणि अनुसृत्य ग्रन्थेऽस्मिन् सूक्तिपरकाणां केषाञ्चन यजुर्वेदीयानां कण्डिकानां मन्त्राणां मन्त्रांशानां वा छात्रोपयोगित्वम् अर्थं विधाय एषा चेष्टा विहिताऽस्ति। विद्यालयेषु शुक्लयजुर्वेदविषयम् अधीयानानां छात्राणां कृते पुस्तकमिदम् उपयोगि भवतीति विश्वस्यते।

# वैदिकसूक्तयः

## इषे त्वोर्जे त्वा (शु.य. १.१)।

भो सूर्यदेव ! अन्नजलादिपदार्थलाभाय, ऊर्जःप्राप्तये च वयं त्वाम् उपास्महे ।

हे सविता (सूर्यदेव) ! अन्न-जलादि पदार्थ र ऊर्जा बल/शक्ति/स्फूर्ति प्राप्तिका लागि हामी तिम्रो उपासना गर्छौं ।

## अग्ने व्रतपते व्रतञ्चरिष्यामि (शु.य. १.५)।

भो व्रतपते अग्ने ! अहं व्रतं पालयिष्यामि ।

हे व्रतपति अग्नि ! मैले व्रत (नियम) को पालना गर्ने छु।

## अहमनृतात् सत्यमुपैमि (शु.य. १.५)।

अहम् असत्यं परित्यज्य सत्यम् अङ्गीकरोमि ।

म असत्यलाई छोडेर सत्यलाई अँगाल्छु।

## अस्माकꣳसन्त्वाशिषः सत्या नः सन्त्वाशिषः (शु.य. २.१०)।

अस्माकम् आशिषः सत्याः सन्तु ।

हाम्रा आशीर्वाद सत्य सिद्ध होऊन्।

**उपहूता पृथिवी माता, उप मां पृथिवी माता ह्वयताम् (शु.य. २.१०)।**

मया माता पृथिवी सादरम् आहूता, माता पृथिवी च मां प्रीणातु ।

मैले पृथिवी मातालाई सम्बोधन (सम्मान) गरेँ, मलाई पनि पृथिवी माताले बोलाऊन् (माया गरून्) ।

**अपहता असुरा रक्षाᳪसि वेदिषदः (शु.य. २.२९)।**

वेद्यां स्थिताः असुरा रक्षांसि च ततः पलायिताः ।

वेदीमा रहेका असुर र राक्षसहरू (ससाना जीवाणु वा भाइरस) यहाँबाट भागे/हटे/हराए/नष्ट भए।

**अग्ने त्वन्नोऽअन्तमऽउत त्राता शिवो भवा वरूथ्यः (शु.य. ३.२५)।**

भो अग्ने ! त्वम् अस्माकं निकटमः देवः असि । अतः त्वम् अस्माकं गृहस्य परिवारस्य च संरक्षकः पालकश्च असि । तस्मात् त्वम् अस्माकं कृते सर्वदैव कल्याणकारी भव ।

ब्रह्मचर्यदेखि अन्त्येष्टिसम्म अग्निको उपासना हुने भएकाले हे अग्नि ! तिमी हाम्रा सबैभन्दा निकटतम देवता हौ। हाम्रो घरपरिवारका संरक्षक र पालक पनि तिमी नै हौ, अतः तिमी हाम्रा लागि सधैँ कल्याणकारी बन।

**उपहूताऽइह गावऽउपहूताऽअजावयः (शु.य. ३.४३)।**

अस्माकं गोष्ठेषु स्थिताः गावः, वृषभाः, अजाः, मेषाश्च सुखिनः भवन्तु ।

हाम्रा गोठमा रहेका गाईगोरु र भेडाबाख्राहरू सुखी होऊन्।

**अन्नस्य कीलालऽउपहूतो गृहेषु नः (शु.य. ३.४३)।**

अस्माकं गृहे अन्नरसस्य वृद्धिर्भवतु ।

हाम्रा घरमा अन्नरसको वृद्धि भइरहोस्।

**क्षेमाय वः शान्त्यै प्रपद्ये शिवꣳशग्मꣳशंयोः शयोः (शु.य. ३.४३)।**

मह्यं सुखशान्ती योगक्षेमौ च प्राप्ताः भवन्तु ।

मलाई सुखशान्ति र योगक्षेम प्राप्त होस्।

**आपोऽअस्मान् मातरः शुन्धयन्तु (शु.य. ४.२)।**

मातेव जगत्पालकानि जलानि अस्मान् पावयन्तु ।

माताले जस्तै समग्र जगत्को पालनपोषण गर्ने मातृरूप जलले हामीलाई शुद्ध/पवित्र बनाऊन्।

**दैवीं धियं मनामहे सुमृडीकामभिष्टये (शु.य. ४.११)।**

सुखाभीष्टलाभाय वयं दैवीं बुद्धिं याचामहे ।

सुख र अभीष्टलाभका लागि हामी दैवी बुद्धिको याचना गर्छौं।

**परि माग्ने दुश्चरिताद् बाधस्व (शु.य. ४.२८)।**

भो अग्निदेव ! त्वं मां दुश्चरितात् निवारय ।

हे अग्निदेव ! तिमी मलाई दुश्चरित्र बन्नबाट जोगाऊ।

## आ मा सुचरिते भज (शु.य. ४.२८)।

भो अग्निदेव ! मां चरित्रवन्तं विधेहि ।

हे अग्निदेव ! तिमी मलाई सच्चरित्रवान्/सदाचारी बनाऊ।

## इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳसुरे स्वाहा (शु.य. ५.१५)।

पृथिव्याम् अग्निरूपेण, अन्तरिक्षे वायुरूपेण, द्युलोके च सूर्यरूपेण जगदीश्वरः त्रिधा स्थितवान् । ईश्वरस्यास्य अद्वैताख्यं स्वरूपम् प्रकृतौ परमाणुरूपेण अन्तर्हितं विद्यते ।

पृथ्वीलोकमा अग्नि, अन्तरिक्षलोकमा वायु र द्युलोकमा सूर्यका रूपमा गरी तीन प्रकारले जगदीश्वर व्याप्त हुनुहुन्छ । तिनै ईश्वरको निर्गुण निराकार स्वरूप प्रकृतिको परमाणुका रूपमा लुकेर रहेको छ ।

## अग्ने नय सुपथा राये (शु.य. ५.३६)।

भो अग्निदेव ! अस्मान् धनलाभाय सन्मार्गं गमय।

हे अग्निदेव ! हामीलाई धनप्राप्तिका लागि असल मार्गमा अग्रसर गराऊ (असल मार्गको अनुसरणबाटै धन कमाऊ)।

## ऋतस्य पथ्याऽअनु (शु.य. ६.१२)।

सत्यस्य मार्गम् अनुसर ।

सन्मार्गको अनुसरण गर।

**मनो मे तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयतात्मानं मे तर्पयत प्रजां मे तर्पयत पशून् मे तर्पयत गणान् मे तर्पयत गणा मे मा वितृषन् (शु.य. ६.३१)।**

भो जलसमूह ! त्वम् अस्माकं मानसम्, वचनम्, प्राणान्, कर्णौ, आत्मानम्, प्रजाम्, पशून्, सेवकान् तृप्तान् (सन्तुष्टान्) कुरु । प्राणिनां समूहाः तव अभावे तृषाकुलाः न भवन्तु ।

हे जलसमूह ! तिमी हाम्रा मन, वचन, प्राण, आँखा, कान, आत्मा, प्रजा, पशु, सेवक सबैलाई तृप्त गराऊ। कुनै पनि गण (मानव-पशु-पक्षीको समूह) तिम्रो अभावमा प्यासले छटपटिन नपरोस्।

**मधुमतीर्न्नऽइषस्कृधि (शु.य. ७.२)।**

भो सोमदेव ! अस्माकं खाद्यान्नं मधुमयं विधेहि ।

हे सोमदेवता ! हामीले खाने अन्नलाई मधुर बनाऊ।

**उदुत्त्यञ्जातवेदसन्देवं वहन्ति केतवः । दृशे विश्वाय सूर्य्यम् (शु.य. ७.४१)।**

निखिलं विश्वं प्रकाशयितुं सूर्यरश्मयः जगत्प्रकाशकं सर्ववेत्तारं द्युस्थानीयं सूर्यदेवम् ऊर्ध्वाकाशं नयन्ति ।

सम्पूर्ण विश्वलाई प्रकाशित गर्नका लागि सूर्यका किरणहरूले सूर्यदेवलाई माथि माथि आकाशमा लैजान्छन् ।

**सूर्य्यऽआत्मा जगतस्तस्थुषश्च (शु.य. ७.४२ + १३.४६)।**

सूर्यः सर्वस्यापि चराचरजगतः आत्मा अस्ति ।

सूर्य सम्पूर्ण चराचर जगत्का (स्थावर-जङ्गमका) आत्मा हुन्।

**कामो दाता कामः प्रतिग्रहीता कामैतत्ते (शु.य. ७.४८)।**

कामनया दीयते, कामनयैव गृह्यते । अतः संसारे सर्वं कामनयैव निर्दिष्टं भवति ।

कामनाद्वारा दिइन्छ, कामनाले नै लिइन्छ। अतः संसारमा सबै कुरा कामनाबाट नै निर्दिष्ट हुन्छन्।

**आदित्यासो भवता मृडयन्तः (शु.य. ८.४)।**

भो आदित्यदेवाः ! यूयम् अस्माकं कृते सुखकर्तारो भवत।

हे आदित्यदेव ! हजुरहरू हाम्रा लागि सुखकर्ता भइदिनुहोस्।

**आ वोऽर्वाची सुमतिर्ववृत्यात् (शु.य.८.४)।**

भो भगवन् आदित्य ! सर्वेषां स्थावरजङ्गमानां हितकारिणी लोकानुग्रहात्मिकी च बुद्धिः अस्मान् प्रति प्रेरिता भवतु ।

हे भगवन् आदित्य ! स्थावर-जङ्गम सबैको हित गर्ने हजुरको अनुग्रहात्मिका बुद्धि हामीप्रति लक्षित होस्।

**संवर्चसा पयसा सन्तनूभिरगन्महि मनसा स ङ्शिवेन। त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् (शु.य. २.२४ + ८.१४, १६)।**

वयं दुग्धादिपदार्थानां सेवनेन हृष्टपुष्टाः तेजस्विनश्च भवेम । वयं कल्याणकारिण्या भावनया युक्ता भवेम । अस्माकं शरीरे विद्यमानानां न्यूनतानां पूरकः देवस्त्वष्टा अस्मान् सम्पन्नान् विदधातु ।

हामी दुग्धादि पदार्थको सेवनद्वारा हृष्टपुष्ट र तेजस्वी बनौं अथवा हामी तेज, दुग्धादि पौष्टिक पदार्थ र स्वस्थ शरीरले युक्त बनौँ। हामी सबै कल्याणमयी भावनाबाट युक्त बनौँ। हाम्रा शरीरमा रहेका न्यूनता पूरा गर्दै त्वष्टा देवताले हामीलाई धनी बनाऊन्।

**अपाᳬंरसम् उद्वयसᳬं सूर्ये सन्तᳬं समाहितम् । अपाᳬंरसस्य यो रसस्तं वो गृह्णाम्युत्तमम् (शु.य. ९.३)।**

जलस्य जीवनप्रदः सारांशः (वायुः) सूर्ये समाहितो भवति । सूर्ये समाहितस्य जलस्य च यः उत्तमः रसः अस्ति, तम् अहं त्वदर्थं गृह्णामि ।

जलको जीवनप्रद सारभाग वायु सूर्यमा समाहित (एकत्रित) भएको हुन्छ। सूर्यमा समाहित जलका रस (वायु) को जुन उत्तम रस हो, त्यो तिम्रा लागि ग्रहण गर्छु।

**आ मा वाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे । आ मा गन्तां पितरा मातरा चा मा सोमोऽअमृतत्वेन गम्यात् (शु.य. ९.१९)।**

मह्यं सोमरूपस्य अन्नस्य प्राप्तिर्भवतु । मम सुखशान्त्यर्थं सर्वरूपात्मकः स्वर्गलोकः, पृथिवीलोकश्च मया सार्धं तिष्ठेताम् । स्वर्गपृथिवीलोकरूपौ मम पितरौ मम रक्षार्थं सदैव मया सार्धं तिष्ठेताम् । मह्यं सोमरूपस्य अमृतस्य लाभः स्यात् ।

मलाई सोमरूप अन्न प्राप्त होस्। मेरो सुखशान्तिका लागि सर्वरूपात्मक स्वर्गलोक र पृथिवीलोक मसँगै रहून्। स्वर्ग र पृथिवीरूप मेरा पिता-माता मेरो रक्षाका लागि मसँगै रहून् (यहाँ आऊन्)। मलाई सोमरूप अमृत रस प्राप्त होस्।

**इमन्देवाऽअसपत्नᳬं सुवध्वम् (शु.य. ९.४० + १०.१८)।**

भो देवा ! यूयं राजानम् एनं शत्रुरहितं कुरुत ।

हे देवता ! तिमीहरूले यी राजालाई शत्रुरहित गराओ।

**सोमोऽस्माकं ब्राह्मणानाᳪराजा (शु.य. ९.४० + १०.१८)।**

चन्द्रमा ब्राह्मणानाम् अस्माकं राजा अस्ति ।

सोम (चन्द्रमा) हामी ब्राह्मणहरूका राजा हुन्।

**पृथिवि मातर्मा मा हिᳪसीर्मोऽअहं त्वाम् (शु.य. १०.२३)।**

भो पृथ्वि मातः ! त्वं मां नैव पीडय, अहञ्च त्वां न पीडयेयम् ।

हे पृथिवी माता ! तिमीले मलाई कष्ट नदेऊ, मैले पनि तिमीलाई कुनै हानि नपुऱ्याऊँ।

**वाचस्पतिर्वाचं नः स्वदतु (शु.य. ११.७)।**

वाचस्पतिः (बृहस्पतिः) अस्माकं वाणीं मधुरां विदधातु ।

वाचस्पतिले हाम्रो वाणीलाई सुमधुर बनाऊन्।

**तमु त्वा दध्यङ्ङृषिः पुत्रऽईधेऽअथर्वणः (शु.य. ११.३३)।**

भो अग्निदेव ! त्वाम् अथर्वणः पुत्रः दध्यङ् ऋषिः प्रदीप्तं चक्रे ।

हे अग्नि ! तिमीलाई सर्वप्रथम अथर्वाका पुत्र दध्यङ् ऋषिले (दधीचि मुनिले) प्रदीप्त गरेका थिए।

**विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् (शु.य. ११.६७)।1**

सर्वान् मनुष्यान् सन्मार्गनायकस्य देवस्य सख्यं प्राप्तं भवेत् ।

सबै मनुष्यलाई सन्मार्गका नायक देवताको सख्यभाव (मैत्री) प्राप्त होस् (सबै मानव देवताप्रति अनुरक्त बनून्)।

**अन्नपतेऽन्नस्य नो देहि, अनमीवस्य शुष्मिणः (शु.य. ११.८३)।**

भो अन्नपते अग्निदेव ! त्वम् अस्मान् रोगनाशकैः बलप्रदायकैश्च अन्नैः पुष्टान् विधेहि ।

हे अन्नका पति (उत्पादक) अग्नि ! तिमी हामीलाई रोगनाशक र बलप्रदायक अन्नद्वारा पोषित बनाऊ।

**प्रप्र दातारं तारिषः (शु.य. ११.८३)।**

भो अन्नपते अग्निदेव ! त्वं दातारम् अन्नेन सन्तोषय ।

हे अन्नपति अग्नि ! तिमी दातालाई अन्नद्वारा सन्तृप्त बनाऊ।

**ऊर्जं नो धेहि द्विपदे चतुष्पदे (शु.य. ११.८३)।**

भो अन्नपते अग्निदेव ! त्वं द्विपदान् चतुष्पदाँश्च नरपश्वादीन् सर्वान् प्राणिनः अन्नेन ऊर्जस्वलान् विधेहि ।

हे अन्नका पति (उत्पादक) अग्नि ! तिमीले दुईखुट्टे तथा चारखुट्टे मनुष्य र गवादि पशुहरूलाई (सबै प्राणीलाई) अन्नद्वारा ऊर्जायुक्त बनाऊ।

**ध्रुवस्तिष्ठाविचाचलिः। विशस्त्वा सर्वा वाञ्छन्तु। मा त्वद्राष्ट्रमधिभ्रशत् (शु.य. १२.११)।**

भो राजन् ! त्वं स्थिरः निश्चलश्च भूत्वा शासनं कुरु । सर्वाः प्रजाः त्वाम् अभिलषन्तु । इदं राष्ट्रं त्वया शून्यं न भवेत् ।

हे राजा ! तिमी स्थिर र निश्चल भएर शासन गर। सबै प्रजा तिमीप्रति आकर्षित बनून्। यो राष्ट्र तिमीबाट शून्य नहोस्।

**गर्भोऽअस्योषधीनांगर्भोवनस्पतीनाम्।गर्भोविश्वस्यभूतस्याग्नेगर्भोऽअपामसि (शु.य. १२.३७)।**

भो अग्निदेव ! त्वं विविधौषधीनाम्, वनस्पतीनाम्, विश्वस्य सर्वेषां प्राणिनाम्, जलानाञ्च गर्भाशयः (बीजम्) असि । अर्थात् त्वया विना एतेषां सर्वेषां सृष्टिः स्थितिश्च न सम्भवति ।

हे अग्नि ! तिमी विभिन्न ओषधि-वनस्पति, जगत्का सम्पूर्ण प्राणी र जलका समेत गर्भाशय हौ अर्थात् तिमीविना यिनको सृष्टि-स्थिति सम्भव छैन।

**सत्याः सन्तु यजमानस्य कामाः (शु.य. १२.४४)।**

यज्ञकर्तुः यजमानस्य कामनाः पूर्णाः सन्तु ।

यज्ञकर्ता यजमानका कामना पूर्ण होऊन् ।

**सीरा युञ्जन्ति कवयः (शु.य. १२.६७)।**

क्रान्तदर्शिनः कृषिविज्ञाः हलेन भूमिं कर्षन्ति ।

क्रान्तदर्शी विद्वान् व्यक्तिहरू (कृषिकर्मका विज्ञहरू) हलो जोत्छन्।

**लाङ्गलं पवीरवत् सुशेवꣳसोमपित्सरु । तदुद्वपति (शु.य. १२.७१)।**

कृषिकर्मणि हलस्य अग्रभावः वज्रतुल्येन कठोरेण, तीक्ष्णेन च फालेन युक्तो विधेयः। त्सरुप्रभृतयः अन्ये अवशिष्टभागाश्च कर्षणविधौ सुखकराः भवेयुः । तथा सति वपनादिकार्यं सरलतया सम्भवति ।

कृषिकर्म गर्दा जोत्ने हलोको अग्रभाग वज्रजस्तै कठोर एवम् तिखो फालीले युक्त हुनुपर्छ (पवीरवत्) भने अन्य भाग अनौ (त्सरु) आदि कृषकले जोत्दा असजिलो नहुने किसिमको सुखकर (सुशीम/सुशेव) हुनुपर्छ ।

**ॐ नमोऽस्तु सर्प्पेभ्यो ये के च पृथिवीमनु । येऽअन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नमः ।। (शु.य. १३.६)**

पृथिवीलोके, अन्तरिक्षलोके, द्युलोके च विद्यमानेभ्यः सूर्यरश्मिभ्यो नमः अस्तु ।

पृथिवी, अन्तरिक्ष र द्युलोकमा रहेका सूर्यका किरणहरूलाई नमस्कार छ ।

**ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्याऽअयम् । अपाᳬरेताᳬसि जिन्वति ।। (शु.य. १३.१४)**

द्युलोकस्य मूर्धास्थानीयः अग्निरूपः सूर्यः वृष्टिरूपेण पतन्तीनाम् अपां कारणभूतानि आहुतिरूपाणि व्रीहियवादीनि वर्धयति । अत एषः पृथिव्याः पालकः अस्ति ।

द्युलोकको शीर्ष स्थानमा अग्नितत्त्वका रूपमा रहेका सूर्यले वृष्टिको कारणभूत आहुतिरूपी जौ, धान आदिका वनस्पतिलाई ताप प्रदान गरी बढाउने काम गर्छन् । त्यसैले सूर्यदेव पृथिवीका पालनकर्ता हुन् ।

**ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री । पृथिवीं यच्छ पृथिवीं दृᳬह पृथिवीं मा हिᳬसीः ।। (शु.य. १३.१८)**

हे सुखाकरे पृथिवि ! त्वं देवमाता असि । त्वं समस्तं विश्वं धारयसि, पोषयसि च । भो मनुष्य ! मातृसमाम् एतादृशीं पृथिवीं रक्ष, तां दृढीकुरु, तस्या हिंसामपि मा कुरु ।

सुखकी खानी हे पृथिवी ! तिमी देवमाता हौ र तिमीले नै समग्र विश्वको धारण एवम् पोषण गरेकी छौ । त्यसैले हे मनुष्य ! मातासमान यस्ती पृथिवीको रक्षा गर, सुदृढ तुल्याऊ र कहिल्यै हानि नगर ।

**ॐ अषाढासि सहमाना सहस्वरातीः सहस्व पृतनायतः । सहस्रवीर्यासि सा मा जिन्व ।। (शु.य. १३.२६)**

हे नारि ! त्वं शत्रून् असहमाना, तेषां दमनशीला च असि। अतः स्वार्थिनः शत्रून् दमय। ये च त्वया सह योद्धुम् इच्छन्ति, तान् प्रति आक्रमणं कुरु। बहुसामर्थ्ययुक्ता त्वं मां प्रीणीहि।

हे नारी ! तिमी शत्रुलाई सहनै नसक्ने, देख्नै नसक्ने स्वभावकी छौ। त्यसैले स्वार्थी शत्रुहरूलाई दबाऊ। तिमीसँग युद्ध गर्न चाहनेमाथि आक्रमण गर। अनेकौं सामर्थ्य भएकी तिमीले मलाई प्रसन्न गराऊ।

**ॐ त्वँ यविष्ठ दाशुषो नॄँः पाहि शृणुधी गिरः । रक्षा तोकमुतत्क्मना ।। (शु.य. १३.१८)**

भो युवन् अग्ने ! त्वं दानशीलान् मनुष्यान् रक्ष। तेषां वचनानि शृणु। स्वयं पुत्रत्वेन तेषां रक्षा विधेया।

जवान अवस्थाका हे बलवान् अग्नि ! दानी मनुष्यहरूको रक्षा गर। तिनीहरूका वचनलाई सुन। स्वयम् पुत्रका रूपमा तिनीहरूको रक्षा गर।

**ॐ कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः । अभि त्वा रुद्रा वसवो गृणन्त्विमा ब्रह्म पीपिहि सौभगायाश्विनाध्वर्यू सादयतामिह त्वा ।। (शु.य. १४.२)**

देवानां यज्ञसम्पादकौ अध्वर्युरूपौ भो अश्विनौ ! सकलप्राणिनां धारयित्र्याः तेजोवत्याः पृथिव्याः सुखदे स्थाने उपविशतम्। वसुरुद्रादयो देवता युवां स्तुवन्तु। सकलैश्वर्यप्राप्तये इमान् वेदमन्त्रान् प्राप्नुतम्, इह प्रतिष्ठेताम् च।

देवताहरूको यज्ञमा अध्वर्यु नामक ऋत्विक्-का रूपमा रहेका हे अश्विनीकुमार हो ! सम्पूर्ण प्राणीहरूलाई आश्रय दिने एवम् पुष्टि प्रदान गर्ने पृथिवीको सुखकारक ठाउँमा बस। वसु, रुद्र आदि देवताले तिमीहरूको स्तुति गरून्। समग्र ऐश्वर्यप्राप्तिका लागि यी वैदिक मन्त्रलाई तिमीहरूले प्राप्त गर र यहाँ प्रतिष्ठित होऔँ।

**ॐ अग्ने वाजस्य गोमतऽईशानः सहसो यहो । अस्मे धेहि जातवेदो महि श्रवः ।। (शु.य. १५.३५)**

मन्थनरूपाद् बलाज्जात, गवाम् अन्नस्य च स्वामिन्, हे सर्वज्ञ अग्ने ! अस्मान् अतितेजस्विनः कुरु।

अरणिमन्थनद्वारा बलपूर्वक उत्पन्न हुने, गवादि पशु र अन्नका मालिक हे सर्वज्ञ अग्निदेव ! हामीलाई अत्यन्त यशस्वी बनाइदिनुहोस्।

**ॐ शिवेन वर्चसा त्वा गिरिशाच्छावदामसि । यथा नः सर्वमिज्जगदक्ष्मꣳसुमनाऽअसत् ।। (शु.य. १६.४)**

हे गिरिश ! त्वां प्राप्तुं वयं स्तुतिरूपेण माङ्गलिकवचनेन प्रार्थयामहे। अस्माकं सर्वमेव जगत् यथा व्याधिरहितं सुमनस्कं च जायते, तथैव विधीयताम्।

हे कैलाशवासी शिव ! हजुरको कृपा प्राप्त गर्न हामी माङ्गलिक स्तुतिद्वारा प्रार्थना गर्छौं। जे जसो गर्दा संसारका सम्पूर्ण प्राणीहरू नीरोगी र सुप्रसन्न रहन सक्छन्, त्यस्तै गरिदिनुहोस्।

**ॐ मा नो महान्तमुत मा नो अर्ब्भकं मा नऽउक्षन्तमुत मा नऽउक्षितम् । मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ।। (शु.य. १६.१५)**

हे रुद्र ! त्वम् अस्माकं गुर्वादीन् महापुरुषान्, पुत्रपौत्रादीन् बालान्, गर्भाधानसमर्थान् यूनः, गर्भस्थान् शिशून्, पितरं, मातरञ्च मा जहि। तथैव अस्माकं प्रेयांसश्च मा हन्तव्याः।

हे रुद्र ! हजुरले हाम्रा पूज्य महापुरुषहरूको; पुत्रपौत्रादि बालबालिकाहरूको; गर्भाधान गर्न समर्थ तरुण युवायुवतीहरूको; गर्भस्थ शिशुहरूको; माता; पिता र प्रियजनहरूको रक्षा गरिदिनुहोस्।

**ॐ मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः । मा नो वीरान् रुद्रभामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ।। (शु.य. १६.१५)**

हे रुद्र ! वयं त्वां सदैव प्रार्थयामहे। त्वम् अस्माकं जीवनम्, पुत्रान्, पौत्रान्, गाः, अश्वाँश्च मा वधीः। एवमेव त्वम् अस्माकं तेजस्विनो वीरान् वीराङ्गनाश्च मा जहि।

हे रुद्र ! हामी सदैव हजुरको प्रार्थना गर्छौं। हजुरले हाम्रो जीवन, पुत्रपौत्रादि सन्तति र गाई, घोडा आदि पशुहरूको क्षति नगरिदिनुहोस्। त्यसैगरी हजुरले हाम्रा तेजस्वी वीर–वीराङ्गनाहरूलाई नमारिदिनुहोस्।

**ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ।। (शु.य. १६.४१)**

लौकिकसुखकारिणे, मोक्षसुखप्रदाय, कल्याणकारिणे च शिवाय नमस्कारः अस्ति।

लौकिक एवम् पारमार्थिक सुख, शान्ति र कल्याण प्रदान गर्ने शिवलाई नमस्कार छ।

**ॐ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः । यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ।। (शु.य. १६.४८)**

हे वीर रुद्र ! यथा द्विपदां मनुष्याणां चतुष्पदां गवादिपशूनाञ्च कल्याणं सम्भवति, येन प्रकारेण अस्माकं ग्रामे निवसन्तः सर्वे प्राणिनः परिपुष्टाः नीरोगाश्च जायन्ते, तस्य कृते अस्मदीया बुद्धिः श्रेष्ठा भवेत् । तया बुद्ध्या विहितानि कर्माणि बलवते जटाजूटधारिणे शूराय तस्मै रुद्राय समर्पयामः ।

हे पराक्रमी रुद्र ! दुई पाउ हुने मनुष्यहरूको र चार पाउ हुने गाई, घोडा आदि पशुहरूको कल्याण जसरी हुन सक्छ, जुन तरिकाले हाम्रो समाजका सम्पूर्ण प्राणीहरू हृष्टपुष्ट र नीरोगी बन्न सक्छन्, त्यसका लागि हाम्रो बुद्धि महान् बनोस् । त्यस्तो बुद्धिद्वारा गरिएका सम्पूर्ण कर्महरू बलशाली, जटाधारी, शूर, वीर रुद्रमा अर्पण गर्छौं ।

**ॐ नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः (.....येऽन्तरिक्षे येषां वातऽइषवः, ..... ये पृथिव्यां येषामन्नमिषवः) । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ।। (शु.य. १६.६४–६६)**

पृथिवीस्थिताय आयुधस्थानीयाय कुत्सितान्नरूपाय, अन्तरिक्षे स्थिताय आयुधस्थानीयाय दूषितवायुरूपाय, द्युलोके विद्यमानाय आयुधस्थानीयाय वृष्टिरूपाय च रुद्राय सर्वासु दिक्षु अभिमुखो भूत्वा दशाङ्गुलिभिः नमस्करोमि । सर्वत्र विद्यमानः एतादृशः रुद्रः अस्माकं द्वेषकरान् विनश्य अस्मान् रक्षतु, सुखिनश्च विदधातु ।

पृथिवीमा रहेका आयुधस्थानीय कुत्सित अन्नरूप रुद्र, अन्तरिक्षमा रहेका आयुधस्थानीय दूषित वायुरूप रुद्र र द्युलोकमा रहेका आयुधस्थानीय वृष्टिरूप रुद्रलाई सबै दिशातर्फ फर्केर दश औँला जोडी नमस्कार गर्छु । सर्वत्र विद्यमान यस्ता रुद्रले हामीमाथि द्वेष गर्नेको नाश गरी हाम्रो रक्षा गरून् र सुख प्रदान गरून् ।

**ॐ विश्वकर्मा ह्यजनिष्ट देवऽआदिद्गन्धर्वोऽअभवद् द्वितीयः । तृतीयः पिता जनितौषधीनामपाङ्गर्भं व्यदधात् पुरुत्रा ।। (शु.य. १७.३२)**

अस्मिन् ब्रह्माण्डे सृष्ट्यादौ दिव्यरूपो विश्वकर्मा जातः। तदनन्तरम् अग्निरुत्पन्नः। तत ओषधीनाम् जनयिता पालयिता च पर्जन्यो जातः। स बहुप्रकारकं गर्भम् अधारयत्।

सृष्टिको सुरुवातमा सर्वप्रथम विश्वकर्मा र त्यसपछि अग्निरूपी सूर्य उत्पन्न भए। तत्पश्चात् औषधीको उत्पत्ति र पालन गर्ने पर्जन्य उत्पन्न भई त्यसले विविध प्रकारका जलीय गर्भधारण गर्यो।

**ॐ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् । सङ्क्रन्दनोऽनिमिषऽएकवीरः शतꣳसेनाऽअजयत्साकमिन्द्रः ।। (शु.य. १७.३३)**

वेगेन शत्रून् प्रहर्तुं क्षमः, तीक्ष्णवज्रधारी, वृषभ इव भीमः, शत्रूणाम् पराजेता घातकः, वैरिणां प्रकम्पकः, स्पर्धायै भयङ्करध्वनिना शत्रूणाम् आह्वाता, अप्रमादी इन्द्र एकाकी एव शतशः शत्रुसेनाः प्रयत्नेनैकेन जेतुं समर्थः अस्ति। कस्मिँश्चिदपि सेनापतौ एतादृशाः गुणाः अपेक्ष्यन्ते।

शत्रुमाथि वेगले प्रहार गर्न सक्ने, तिखो वज्र धारण गर्ने, साँढे झैं भीमकाय, शत्रुलाई परास्त गर्न सक्ने, दुष्ट मानिसहरूको मनलाई चञ्चल गराउन सक्ने, ठुलो गर्जनाद्वारा शत्रुलाई युद्ध गर्न उक्साउने, सावधानीपूर्वक काम गर्ने इन्द्र एक्लै नै शत्रुका सयौँ सेनालाई एकै पल्टमा जित्न समर्थ छन्। कुनै पनि सेनापतिमा यस्तै गुणहरू आवश्यक पर्छन्।

**ॐ यत्र बाणाः सम्पतन्ति कुमारा विशिखाऽइव । तन्नऽइन्द्रो बृहस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ।। (शु.य. १७.४८)**

अतिबालाश्चपलाः सन्तो यथा इतस्ततो गच्छन्ति, तद्वत् यस्मिन् सङ्ग्रामे शस्त्रास्त्राणि यत्रतत्र निपतन्ति। तत्र पराक्रमी इन्द्रः अस्मभ्यं शरणं प्रददातु। विजयोचितमन्त्रज्ञो

बृहस्पतिः, अखण्डितशक्तियुता देवमाता अदितिश्च सर्वदैव अस्मभ्यं विजयरूपं सुखं ददातु।

जसरी साना बच्चाहरू चञ्चल हुँदै जतासुकै जाने काम गर्छन्, त्यसै गरी जुन युद्धमा जताततै बाण, शस्त्र, अस्त्र आदिको प्रहार हुन्छ, त्यहाँ पराक्रमी इन्द्रले हामीलाई शरण दिऊन्। विजयको उपाय जान्ने देवगुरु बृहस्पति र अखण्डित शक्तिले सम्पन्न देवमाता अदितिले हामीलाई सधैँ विजयी गराई सुख प्रदान गरून्।

**ॐ सत्यञ्च मे श्रद्धा च मे जगच्च मे धनञ्च मे विश्वञ्च मे महश्च मे क्रीडा च मे मोदश्च मे जातञ्च मे जनिष्यमाणञ्च मे सूक्तञ्च मे सुकृतञ्च मे यज्ञेन कल्पन्ताम् ।। (शु.य. १८.५)**

यथार्थभाषणरूपं सत्यम्, परलोके विश्वासरूपा श्रद्धा, गवादि जङ्गमरूपं जगत्, पर्वतादि स्थावररूपं विश्वम्, कनकादि धनम्, मनोरञ्जका क्रीडा, क्रीडादर्शनजो हर्षः, सन्तानोत्पत्तिः, वंशपरम्परा, मधुरं वचनम्, पुण्यकर्म च यज्ञेन अस्मभ्यं प्राप्तिर्भवेत्।

साँचो बोल्ने क्षमता, परलोकप्रति विश्वास गर्ने श्रद्धा, चराचर संसारको ज्ञान, धन सम्पत्ति, मनोरञ्जक खेलबाड र त्यसलाई देखेर हुने खुसी, सन्तान उत्पादन र त्यसको निरन्तरता, मधुर बोलीवचन, पुण्यकर्मजस्ता कुराहरू यज्ञद्वारा हामीलाई प्राप्त होऊन्।

**ॐ वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे । यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म साविषत् ।। (शु.य. १८.३०)**

अन्नदात्रीं जगत्प्रसविनीं देवमातरं महनीयां पृथिवीं वयं वेदवचसा स्तुमः, यस्यां भुवि सर्वे प्राणिनः प्रतिष्ठिताः सन्ति। तादृश्यां पृथिव्यां देवः सविता अस्माकं निवासं सुखदं करोतु।

अन्नदात्री, जगन्निर्मात्री देवमाता महनीया पृथिवीलाई हामी वेदवाणीद्वारा स्तुति गर्छौं, जुन पृथिवीमा समग्र विश्वका प्राणीहरू अटेका छन्। त्यस्ती पृथिवीमा सविता देवले हाम्रो वासस्थान सुखद बनाइदिऊन्।

**ॐ नाना हि वां देवहितꣳसदस्कृतं मा सꣳसृक्षाथां परमे व्योमन् । सुरा त्वमसि शुष्मिणी सोमऽएष मा मा हिꣳसीः स्वां योनिमाविशन्ती ।। (शु.य. १९.७)**

सुरायाः सोमस्य च स्थानं पृथक् पृथक् भवति। एतौ भिन्नप्रकृतिकौ स्तः। सुरा बलवती तमोगुणात्मिका भवति, तां पीत्वा मत्तो जायते। सोमः शुद्धः शान्तश्च सत्त्वगुणी भवति। अतः अनयोः संसर्गः सर्वथा निषिद्धः।

सुरा र सोमरस फरक प्रकृतिका हुन्छन्। सुरा बलले युक्त तमोगुणी हुन्छ, जसलाई पिएपछि उन्मत्त भइन्छ। सोमरस शुद्ध र शान्त प्रकृतिको सत्त्वगुणी हुन्छ। त्यसैले यी दुई सँगै रहन सक्दैनन्।

**ॐ यदा पिपेष मातरं पुत्रः प्रमुदितो धयन् । एतत्तदग्नेऽअनृणो भवाम्यहतौ पितरौ मया । सम्पृचस्थ सं मा भद्रेण पृङ्क्त । विपृचस्थ विमा पाप्मना पृङ्क्त ।। (शु.य. १९.११)**

बाल्यावस्थायां प्रमुदितो भूत्वा स्तनपानं कुर्वन् अहं पद्भ्यां मातरं पीडितवान्। हे अग्ने ! अहम् ऋणरहितो भवामि। मया मातापितरौ कदापि न पीडितौ। संयोजने वियोजने च समर्थ हे परमेश्वर ! मां कल्याणयुक्तं कुरु, पापाद् विमुक्तञ्च विधेहि।

अबोध बालावस्थामा आमाको स्तनपान गर्दै गर्दा मैले आमालाई गोडाले हानेर दुःख दिएँ। हे अग्निदेव ! म देवता, ऋषि र पितृको तिनै थरी ऋणबाट मुक्त हुन सकूँ। मैले जानेर आफ्ना माता, पितालाई कहिल्यै पीडा दिएको छैन। हे परमेश्वर ! हजुर जोड्न पनि छुटाउन पनि समर्थ हुनुहुन्छ। त्यसैले मलाई कल्याणकारी बनाउनुहोस् र पापबाट मुक्त गराउनुहोस्।

**ॐ धानाः करम्भः सक्तवः परीवापः पयो दधि । सोमस्य रूप६ हविषऽआमिक्षा वाजिनं मधु ।। (शु.य. १९.२१)**

उष्णे दुग्धे दधनि क्षिप्ते सति घनभाग आमिक्षोच्यते, शिष्टञ्च वाजिनम्। आमिक्षा, वाजिनम्, मधु, धानाः भृष्टधान्यानि, करम्भः दधिसक्तुः, सक्तवः भृष्टयवपिष्टानि, परीवापः, पयः, दधि इत्येतानि हविषः सोमस्य रूपाणि विद्यन्ते। एते पदार्थाः हविष्याः पुष्टिकारकाः सन्तीति भावः।

तातो दुधमा दही मिसाउँदा फाटेपछि कठिन भाग आमिक्षा र तरल भाग वाजिन बन्छ। त्यही आमिक्षा, वाजिन, मह, भुटेको धान, दहीमिश्रित सातु, जौको सातु, दुध र दही हवनीय सोमका रूप हुन्। उक्त हविष्य पदार्थहरू पुष्टिकारक हुन्छन्।

**ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् । दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ।। (शु.य. १९.३०)**

सत्यवदनादिरूपेण व्रतेन प्रज्ञाभिवर्धते। प्रज्ञया श्रियः प्रतिष्ठायाश्च प्राप्तिर्भवति। ततः सत्यधारणात्मिका श्रद्धोपलभ्यते। श्रद्धया सत्यं ज्ञानम् अनन्तं ब्रह्म प्राप्यते।

व्रतको पालन गर्नाले प्रज्ञाशक्ति बढ्छ, प्रज्ञाशक्तिद्वारा धन, सम्पत्ति र प्रतिष्ठाको प्राप्ति हुन्छ। तत्पश्चात् सत्यको धारणरूप श्रद्धाभाव उत्पन्न हुन्छ। श्रद्धाद्वारा सत्यरूप परब्रह्मको ज्ञान हुन पुग्छ।

**ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ।। (शु.य. १९.३९)**

देवानुगामिनो मां पुनन्तु, मम मनः बुद्धिञ्च पवित्रीकुर्वन्तु। सर्वाणि भूतानि मां पवित्रं कुर्वन्तु। सर्वज्ञः अग्निश्च मां पुनातु।

देवताको अनुसरण गर्नेले मलाई अनि मेरो मन र बुद्धिलाई पवित्र गरून्। संसारका सम्पूर्ण प्राणीले मलाई पवित्र तुल्याऊन्। सर्वज्ञ अग्निले पनि मलाई पवित्र गरून्।

**ॐ दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः । अश्रद्धामनृतेऽदधाच्छ्रद्धाᳫ᳭सत्ये प्रजापतिः ।। (शु.य. १९.७७)**

सत्यासत्ययोः रूपे दृष्ट्वा परमेश्वरः सत्ये श्रद्धाम्, असत्ये च अश्रद्धाम् अदधात्।

सत्य र असत्यको स्वरूपलाई हेरेर परमेश्वरले सत्यप्रति श्रद्धा र असत्यप्रति अश्रद्धा (घृणा) को भाव व्यक्त गरे।

**ॐ पयसा शुक्रममृतं जनित्रᳫ᳭सुरया मूत्राज्जनयन्त रेतः । अपामतिं दुर्मतिं बाधमानाऽऊवद्ध्यं वातᳫ᳭सब्वं तदारात् ।। (शु.य. १९.८४)**

गोः दुग्धपानेन शुद्धम् अमृतम् अपत्योत्पादनसमर्थं च वीर्यम् उत्पद्यते। तेन अज्ञानं दुष्टमतिं च विनश्य सद्बुद्धिः प्रकाश्यते। आमाशयगतमन्नं नाडीगतं भूत्वा पक्वाशयगतमन्नं च सुरया मूत्रत्वेन गच्छति।

गाईको दुध पान गर्नाले शुद्ध, अमृत र प्रजननशील वीर्यशक्ति उत्पन्न हुन्छ, जसबाट अज्ञान र दुर्बुद्धिको नाश भएर सद्-बुद्धि प्राप्त हुन्छ। आमाशयमा भएको अन्नको रस नसामा र पक्वाशयमा गएको अन्न सुरारसका माध्यमले मूत्रका रूपमा जान्छ।

**ॐ जिह्वा मे भद्रं वाङ्महो मनो मन्युः स्वराड् भामः । मोदाः प्रमोदाऽअङ्गुलीरङ्गानि मित्रम्मे सहः ।। (शु.य. २०.६)**

मम जिह्वा कल्याणरूपा अस्तु। मम वाणी पूज्या अस्तु। मम क्रोधः कञ्चिद् न हन्तु। मम करचरणावयवा अङ्गुलयः सर्वदैव सोत्साहाः सन्तु। मम सर्वाणि अङ्गानि प्रमुदितानि भवन्तु। कर्मसामर्थ्यमेव मम मित्रम् अस्तु।

मेरो जिब्राले शुद्ध, कल्याणकारी भोजन मात्र ग्रहण गरोस्। मेरो बोली हितकारी, श्रेष्ठ होस्। मेरो क्रोधले कसैको हानि नगरोस्। मेरा हातपाउका औँलाहरू सदैव परिश्रमका निम्ति उत्साहित होऊन्। मेरा सम्पूर्ण अङ्गहरू हर्ष, आनन्दले युक्त बनून्। कर्म गर्नका लागि शारीरिक एवम् मानसिक सामर्थ्य नै मेरो मित्र होस्।

**ॐ पृष्टीर्मे राष्ट्रमुदरमꣳसौग्रीवाश्च श्रोणी । ऊरूऽअरत्नी जानुनी विशो मेऽङ्गानि सर्वतः ।। (शु.य. २०.८)**

मम पृष्ठप्रदेशो राष्ट्रवत् सर्वाधारो भवतु। मम उदरम्, स्कन्धौ, ग्रीवा, कटिप्रदेशौ, ऊरू, हस्तौ, जानुनी इत्यादीनि सकलानि अङ्गानि प्रजावत् पोष्याणि सामर्थ्यवन्ति च भवन्तु। यः स्वदेहाङ्गवत् प्रजाः जानाति, स राजा सर्वदैव वर्धत इति भावः।

जसरी कुनै पनि राष्ट्र सम्पूर्ण जनताको आश्रयस्थल हुन्छ, त्यसरी नै मेरो शरीरको पीठभाग सबैको आधार बनोस् अर्थात् सम्पूर्ण जनता ममाथि निर्भर रहून्। पेट, काँध, घाँटी, कम्मर, तिघ्रा, हात, गोडा, घुँडा आदि मेरा शारीरिक अङ्ग झैं जनताहरू भरणपोषणका लागि योग्य र समर्थ बनून्। जुन राजा या नेताले जनतालाई आफ्ना शारीरिक अङ्ग झैं प्रिय सम्झन्छ, ऊ सदैव अघि बढ्छ।

**ॐ नाभिर्मे चित्तं विज्ञानं पायुर्मेऽपचितिर्भसत् । आनन्दनन्दावाण्डौ मे भगः सौभाग्यम्पसः । जङ्घाभ्यां पद्भ्यां धर्मोऽस्मि विशि राजा प्रतिष्ठितः ।। (शु.य. २०.९)**

अस्माकं सर्वाणि इन्द्रियाणि धर्मसाधकानि भवन्तु। नाभिः गुदेन्द्रियं च ज्ञानाधारमस्तु, प्रजननाङ्गं सत्पुत्रोत्पादनसमर्थं जायताम्, अण्डकोषौ सुखभोक्तारौ भवताम्, लिङ्गं सौभाग्यरूपं भवतु। जङ्घाभ्यां पद्भ्याञ्च धर्मस्य कृते प्रवृत्तिर्भवेत्।

हाम्रा सम्पूर्ण इन्द्रियहरू धर्मका साधन बनून्। नाभि र गुदेन्द्रिय ज्ञानका आधार होऊन्, जननेन्द्रिय असल सन्तति उत्पादन गर्न समर्थ होस्, अण्डकोषले सम्भोगसुख प्राप्त गरून्, लिङ्ग सौभाग्यवान् होस्। जाँघ र पाउ धर्मका निम्ति प्रवृत्त होऊन्।

**ॐ यद्देवा देवहेडनं देवासश्चकृमा वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ।। (शु.य. २०.१४)**

हे देवाः ! वयं यं दैवापराधं कृतवन्तः, तस्माद् अपराधात् सर्वस्माद् दुर्व्यसनाच्च अग्निः अस्मान् मुञ्चतु ।

हे देवताहरू ! हामीबाट हजुरहरूप्रति कुनै अपराध भएको छ भने त्यस अपराधबाट र सम्पूर्ण खराब व्यवहारबाट हामीलाई अग्निदेवले मुक्त गरून् ।

**ॐ यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम् । वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ।। (शु.य. २०.१५)**

दिवा रात्रौ च वयं यानि दुष्कृतानि कृतवन्तः, तस्माद् अपराधात् सर्वस्माद् दुर्व्यसनाच्च वायुः अस्मान् मुञ्चतु ।

हामीले दिनमा वा रातमा जेजस्ता दुष्कर्म गरेका छौँ, तिनको अपराधबाट र सम्पूर्ण खराब व्यवहारबाट हामीलाई वायुदेवले मुक्त गरून् ।

**ॐ यदि जाग्रद्यदिस्वप्नऽएनाꣳसि चकृमा वयम् । सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ।। (शु.य. २०.१६)**

जाग्रदवस्थायां स्वप्नावस्थायां वा यदि वयं पापकर्माणि कृतवन्तः, तस्माद् अपराधात् सर्वस्माद् दुर्व्यसनाच्च सूर्यः अस्मान् मुञ्चतु ।

जाग्रत या स्वप्न अवस्थामा यदि हामीबाट पापकर्म भएका रहेछन् भने तिनको अपराधबाट र सम्पूर्ण खराब व्यवहारबाट हामीलाई सूर्यदेवले मुक्त गरून् ।

**ॐ यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये । यच्छूद्रे यदर्ये यदेनश्चकृमा वयं यदेकस्याधिधर्मणि तस्यावयजनमसि ।। (शु.य. २०.१७)**

हे वरुण ! ग्रामे, अरण्ये, सभायाम्, इन्द्रियविषये, शूद्रकर्मणि, वैश्यकर्मणि च यद् पापं वयं कृतवन्तः, तस्य नाशं विधत्त।

गाउँसमाजमा, वनजङ्गलमा, सभासमारोहमा, इन्द्रियका विषयमा, सेवासत्कारका बखतमा, व्यापारव्यवसायका सन्दर्भमा हामीबाट कुनै पापकर्म भएको छ भने हे वरुणदेव ! हजुरले त्यसको नाश गरिदिनुहोस्।

**ॐ इन्द्रन्दुरः कवष्यो धावमाना वृषाणं यन्तु जनयः सुपत्नीः । द्वारो देवीरभितो विश्रयन्ताᳪसुवीरा वीरं प्रथमाना महोभिः ।। (शु.य. २०.४०)**

यथा प्रजननसमर्थाः शोभनपत्न्यो वीर्यसेचनसमर्थं वीरपुरूषं प्रति धावमाना यान्ति, तथैव यज्ञशालायाः द्वाराणि वृष्टिकारकं वीरम् इन्द्रं प्राप्नुवन्तु, इन्द्रस्य आगमनार्थं सुपूजितैर्गुणैः तानि द्वाराणि सर्वतो विस्तृतानि भवन्तु। यज्ञेन वृष्टिर्भवतीत्यर्थः।

जसरी सन्तान जन्माउन चाहने सुशील स्त्री वीर्यसेचन गर्न सक्ने वीर पुरुषप्रति आकर्षित हुन्छिन्, त्यसै गरी वर्षा गराउने वीर इन्द्रलाई यज्ञशालाका द्वारहरूले प्राप्त गरून्, आफ्ना पूज्य गुणद्वारा ती ढोकाहरू इन्द्रको आगमनका लागि सबैतिरबाट खुला रहून्। यज्ञले वृष्टिको द्वार खुला गरिदिन्छ भन्ने यसको सार हो।

**ॐ त्वामद्यऽऋषऽआर्षेयऽऋषीणां नपादवृणीतायं यजमानो बहुभ्यऽआसङ्गतेभ्यऽएष मे देवेषु वसु वार्या यक्ष्यतऽइति ता या देवा देवदानान्य दुस्तान्यस्माऽआचशास्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ताब्रूहि ।। (शु.य. २१.६१)**

ऋषीणां पुत्ररूप हे ऋत्विक् ! अयं यजमानः त्वामेव वृतवान्, एषोऽग्निः वरणीयं धनं दास्यति। हे अग्ने ! मह्यं यानि दानानि देवा दत्तवन्तः, तानि यजमानाय दातव्यानि। हे होतः ! त्वं सूक्तानि वचनानि वक्तुं प्रेरितोऽसि।

ऋषिमुनिका पुत्ररूप हे ऋत्विक् ! यी यजमानले तिमीलाई वरण गरेका छन्। यी अग्निदेवले उत्तम धन दिनेछन्। हे अग्निदेव ! देवताहरूले मलाई जुन दान दिएका छन्, ती दान यजमानका लागि योग्य छन्। हे होता ! हितकर सूक्तिमय वाणी बोल्नका लागि हजुर प्रेरित हुनुहोस्।

**ॐ हिरण्यपाणिमूतये सवितारमुपह्वये स चेत्ता देवता पदम् ।। (शु.य. २२.१०)**

अहं सर्वेषां ज्ञानिनाम् आश्रयं, सर्वज्ञं, हिरण्यपाणिं, सर्वप्रेरकं देवं सवितारं स्वरक्षार्थम् आह्वयामि।

सम्पूर्ण ज्ञानीहरूका आश्रय भएका, सर्वज्ञ, सुवर्णमय एवम् सबैका प्रेरक सूर्यदेवलाई म आफ्नो रक्षाका लागि आह्वान गर्छु।

**ॐ देवस्य चेततो महीं प्रसवितुर्हवामहे । सुमतिꣳसत्यराधसम् ।। (शु.य. २२.११)**

वयं सर्वज्ञस्य चेतनशीलस्य सवितुर्देवस्य महतीं सत्यसाधिकां शोभनां बुद्धिं प्रकर्षेण प्रार्थयामहे।

सम्पूर्ण कुरा जान्ने चेतनशील सूर्यदेवको महान् तथा परम सत्यको साक्षात्कार गराउने सद्बुद्धिलाई प्राप्त गर्न हामी अत्यन्त इच्छा गर्छौं।

**ॐ देवस्य सवितुर्मतिमासवं विश्वदेव्यम् । धिया भगं मनामहे ।। (शु.य. २२.१४)**

सर्वप्रेरकस्य सवितुर्देवस्य कल्याणकारि धनम्, येन धनेन देवतर्पणादिकर्म भवति, तादृशं धनं वयं स्वधिया स्तुत्या च याचामहे।

सबैका प्रेरक सूर्यदेवको कल्याणकारी अलौकिक त्यस्तो धन हामी आफ्नो बुद्धि वा स्तुतिद्वारा प्राप्त गर्न चाहन्छौं, जसबाट देवतर्पणादि पुण्यकर्मको सम्पादन हुन सक्छ।

**ॐ आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूरऽइषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठा सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ।। (शु.य. २२.२२)**

हे परब्रह्मन् ! अस्माकं राष्ट्रे ब्राह्मणा ब्रह्मवर्चस्विनो यजनशीला अध्ययनशीलाश्च जायन्ताम्। क्षत्रियाः पराक्रमिणो वीराः धनुर्धारिणः शत्रुनाशका महारथिनश्च जायन्ताम्। तथैव धेनवो दुग्धपूरयित्र्यो भवन्तु, वृषभा वहनशीलाः सन्तु, अश्वाः शीघ्रगामिनो भवन्तु। एवमेव नार्यः शीलवत्यः सन्तु, योद्धारः सदैव जयन्तु, युवानः सभायां योग्या भवन्तु, पुत्रपुत्र्यादयः सन्ततयः निषेचनसमर्थाः जायन्ताम्। तेनैव प्रकारेण यथाकालं पर्जन्यो वर्षतु, यवादयः ओषधयः फलयुक्ताः स्वयमेव पक्वाश्च भवन्तु। अप्राप्तस्य प्राप्तिः, प्राप्तस्य च परिपालनं भवतु।

हे परब्रह्म परमात्मा ! हाम्रो राष्ट्रमा ब्राह्मणहरू यज्ञयागादि सम्पादन गर्ने, अध्ययनशील र तेजस्वी होऊन्। क्षत्रियहरू पराक्रमी, वीर, अस्त्र चलाउन सिपालु, शत्रुलाई जित्न सक्ने महारथी होऊन्। त्यसै गरी गाई दुधालु होऊन्, गोरु भारी बोक्न समर्थ होऊन्, घोडा शीघ्रगामी होऊन्। स्त्रीजाति सर्वगुणसम्पन्न सुशील होऊन्, योद्धाहरू सधैँ जित्न सकून्, युवाहरू सभामा बस्न योग्य होऊन्, सन्ततिहरू सन्तानोत्पादन गर्न समर्थ होऊन्। त्यस्तै वृष्टि हुनपर्ने समयमा वृष्टि होस्। जौ, धान आदि औषधीय पदार्थहरू निष्फल नहोऊन्, समयमै पाकून्। अप्राप्त वस्तुको प्राप्ति होस् र प्राप्त वस्तुको भोग गर्न पाऔँ।

**ॐ स्वयं वाजिँस्तन्वं कल्पयस्व स्वयं यजस्व स्वयं जुषस्व । महिमा तेऽन्येन न सन्नशे ।। (शु.य. २३.१५)**

हे अश्व ! त्वं यादृशमिच्छसि तादृशं शरीरं कल्पयस्व, धारय। स्वयमेव यजनं कुरु, इष्टस्थानमपि स्वयमेव सेवस्व। यतो हि अन्येन तव महिमा न लभ्यते, स्वयमेव यत्नवान् भव।

हे अश्व ! तिमी जुन प्रकारको रूपको इच्छा गर्छौ, त्यस्तै शरीर धारण गर। आफैं यज्ञ गर र चाहेको स्थानको उपभोग पनि आफैँ गर, किनकि अरु कसैबाट तिम्रो महिमा प्राप्त हुन सक्दैन, स्वयम् प्रयत्न गर।

**ॐ आनोभद्राः क्रतवो यन्तु विश्वतो दब्धासोऽअपरीतासऽउद्भिदः । देवा नो यथा सदमिद् वृधेऽअसन्नप्रायुवो रक्षितारो दिवे दिवे ।। (शु.य. २५.१४)**

यज्ञकर्तारो वयं कल्याणकारिणः सर्वतो निर्विघ्नाः शुभसङ्कल्पवन्तश्च भवेम। अस्माकं वृद्ध्यै देवताः सदैव अप्रमादिनो भवन्तु। ते देवाः प्रत्यहं रक्षितारो भवन्तु।

यज्ञयागादिमा प्रवृत्त हामी सम्पूर्ण विघ्नबाधाले रहित भई कल्याणकारी र शुभ चिन्तन गर्नेवाला बनौं। हाम्रो समुन्नतिका लागि देवताहरू कहिल्यै पनि नचुकून्। ती देवताले सधैं हाम्रो रक्षा गरून्।

**ॐ देवानां भद्रा सुमतिर्ऋजूयतां देवानाꣳरातिरभिनो निवर्तताम् । देवानाꣳसख्यमुपसेदिमा वयं देवा नऽआयुः प्रतिरन्तु जीवसे ।। (शु.य. २५.१५)**

ऋजुगामिनां देवानां कल्याणकारिणी शोभना बुद्धिः अस्मान् प्रति आयातु। देवताः अस्मभ्यं दानं कुर्वन्तु। वयं देवैः सह मैत्रीभावं प्राप्नुयामः। चिरं जीवनाय ते देवा अस्माकं आयुः प्रवर्धयन्तु।

देवताहरूले हाम्रो बुद्धिलाई निर्मल र कल्याणकारी बनाऊन्। देवताहरूबाट वरदान प्राप्त गर्ने पात्रता हामीमा रहोस्। देवताहरू हाम्रा सखा बनून्। ती देवताले हाम्रो दीर्घ जीवनका लागि आयु बढाइदिऊन्।

**ॐ तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् । अर्यमणं वरुणꣳसोममश्विना सरस्वती नः सुभगा मयस्करत् ।। (शु.य. २५.१६)**

अकृत्रिमया वेदरूपया वाचा वयम् अच्युतं भगं मित्रं देवमातरम् अदितिम्, दक्षप्रजापतिम्, अर्यमणं वरुणं सोमं, अश्विनौ च आह्वयामः। वेदविद्यायै भजनीया सरस्वती अस्मभ्यं सुखं प्रददातु।

परमात्माको निःश्वासरूप वैदिक वाणीद्वारा हामी कहिल्यै नचुक्ने भग, मित्र, देवमाता अदिति, दक्षप्रजापति, अर्यमा, वरुण, सोम र अश्विनीकुमारलाई आवाहन गर्छौं। वेदविद्याको प्राप्तिका लागि सौभाग्यशालिनी वन्दनीया सरस्वतीले हामीलाई सुख प्रदान गरून्।

**ॐ तन्नो वातो मयो भुवातु भेषजं तन्माता पृथिवी तत्पिता द्यौः । तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ।। (शु.य. २५.१७)**

पवनः, माता पृथिवी, पिता द्युलोकश्च अस्मभ्यं सुखकरम् औषधं ददतु। सोमाभिषवकारिणो ग्रावाणश्च सुखस्य दातारः सन्तु। हे अश्विनौ ! अस्माकं भेषजप्रार्थनां श्रुत्वा युवां च हितं कुरुतम्।

वायु, माता पृथिवी र पितारूप द्युलोकले हामीलाई सुखप्रद औषधीहरू प्रदान गरून्। सोमलताको रस निकाल्न प्रयोग गरिने पत्थरहरू प्रतिकूल नबनून्। हे अश्विनीकुमार ! हाम्रो यो प्रार्थना सुनेर हजुरहरूले पनि हाम्रो हित गर्नुहोस् अर्थात् हामी स्वस्थ रहौँ।

**ॐ तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ।। (शु.य. २५.१८)**

यथा धनानां ज्ञानानां वा रक्षकः, पुत्रादीनां पालकः पूषा अस्माकं वृद्ध्यर्थं कल्याणाय च प्रार्थ्यते, तथैव वयं जङ्गमस्य स्थावरस्य च प्राणिजातस्य पालकं बुद्धिसन्तोषकारकं परमात्मानम् अस्माकं रक्षणाय आह्वयामः।

ज्ञान वा धनका रक्षक, पुत्रादि सन्ततिका पालक पूषा देवतालाई जसरी हामी वृद्धि र कल्याणका निम्ति प्रार्थना गर्छौं, त्यसरी नै स्थावर र जङ्गमरूप जीवसमुदायको पालक, बुद्धिलाई प्रसन्न गर्नेवाला परमात्मालाई हाम्रो रक्षाका लागि आवाहन गर्छौं।

**ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष् टनेमिः स्वस्तिनो बृहस्पतिर्द्दधातु ।। (शु.य. २५.१९)**

महान् यशस्वी इन्द्रोऽस्मभ्यम् अविनाशिनं शुभं ददातु। तथैव सर्वज्ञः पूषा, अहिंसको गरुडदेवः, देवगुरुः बृहस्पतिश्च अस्मभ्यं स्वस्ति ददतु।

महान् कीर्तिशाली इन्द्रले हामीलाई अविनाशी कल्याण प्रदान गरून्। त्यसैगरी सर्वज्ञ पूषा देवता, दयालु गरुड र देवगुरु बृहस्पतिले पनि हाम्रो कल्याण गरून्।

**ॐ पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो विदथेषु जग्मयः । अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवाऽअवसा गमन्निह ।। (शु.य. २५.२०)**

शबलाश्वयुक्ताः मरुतो देवताः, अदितिपुत्राः, कल्याणकारिणः, यज्ञेषु गमनशीलाः, अग्निमाध्यमेन हविर्भुजः, सर्वज्ञाः, प्रकाशवन्तः सर्वे देवाश्च अस्माकं यज्ञे हविर्ग्रहणार्थम् आगच्छन्तु।

रङ्गीबिरङ्गी घोडाले युक्त मरुत् देवता र देवमाता अदितिका सन्तान, आवाहित यज्ञमा जाने स्वभाव भएका, अग्निका माध्यमले हवि ग्रहण गर्ने, कल्याणकारी, सर्वज्ञ, प्रकाशवान् सम्पूर्ण देवता हाम्रो यज्ञमा हवि ग्रहण गर्नका लागि आउनुहोस्।

**ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस् तनूभिर्व्यशेमहि देवहितं यदायुः ।। (शु.य. २५.२१)**

भो देवाः ! वयं कर्णैः सदा हितवचांसि शृणुयाम। नेत्रैः सदा मङ्गलप्रदानि दृश्यानि पश्येम। वयं दृढैः करचरणादिभिरङ्गैः शरीरैश्च भवतः स्तुवन्तः सन्तो देवोपासनायोग्यं आयुः प्राप्नुयाम।

हे देवता हो ! हामीहरू कानद्वारा सधैं हितकारी वाणीहरू सुनौं। हाम्रा आँखाले सधैं मङ्गलकारी दृश्य देखून्। हात, गोडाजस्ता सशक्त शारीरिक अङ्गद्वारा हजुरहरूको स्तुति गर्छौं। देवताको उपासना गर्नका निम्ति जति आयुको आवश्यकता पर्छ, त्यति आयु हामीलाई प्राप्त होस्।

**ॐ शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ।। (शु.य. २५.२२)**

हे देवाः ! शतं वर्षाणि, अस्माकं वृद्धावस्थापर्यन्तं यूयं समीपे भवत। यत्र अस्माकं पुत्राश्च पुत्रवन्तो भवन्ति, यावदस्माकं पौत्राः जायन्ते, तावत्कालपर्यन्तम् अस्माकं गमनशीलम् आयुः मा हिंस्त।

हे देवताहरू ! सयौँ वर्षसम्म हाम्रो साथमा रहिदिनुहोस्, हाम्रो आयु सयौँ वर्षको होस्। हाम्रो शरीरलाई त्यतिबेला बुढो बनाइदिनुहोस्, जतिबेला हाम्रा छोरा–छोरी सन्तानले युक्त हुने छन्, हाम्रा नाति–नातिना जन्मने छन्। त्यतिञ्जेल हाम्रो गतिशील जीवनलाई समाप्त नगरिदिनुहोस्।

**ॐ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः । विश्वेदेवाऽअदितिः पञ्चजना ऽअदितिर्जातमदितिर्जनित्वम् ।। (शु.य. २५.२३)**

द्युलोकः, अन्तरिक्षलोकः, माता, पिता, पुत्रः, सर्वे देवाः, मनुष्याः, उत्पन्नप्राणिसमूहः, जनिष्यमाणाः प्राणिनश्च सर्व एव अदितिरूपाः सन्ति।

द्युलोक, अन्तरिक्षलोक, माता, पिता, पुत्र, समस्त देवयोनि, मनुष्यहरू, उत्पन्न भएका र भविष्यमा उत्पन्न हुनेवाला सम्पूर्ण प्राणीहरू अदितिका रूप हुन्।

**ॐ सुगव्यन्नो वाजी स्वश्व्यं पुꣳसः पुत्राँ२।।ऽउत विश्वापुषꣳरयिम् । अनागास्त्वन्नोऽअदितिः कृणोतु क्षत्रं नोऽअश्वो वनता हविष्मान् ।। (शु.य. २५.४५)**

अश्वमेधयागे अश्वः प्रार्थ्यते - देवरूपः अश्वः अस्मभ्यं शोभनं गोसमूहम् अश्वसमूहञ्च ददातु। एवमेव अस्मभ्यं पुरुषार्थसाधकान् पुत्रान् सर्वजनपोषणसमर्थं धनञ्च ददातु। एवमेव अस्मान् पापान्मोचयतु।

अश्वमेधनामक यागमा अश्वको प्रार्थना गरिन्छ – देवत्वमा प्राप्त अश्वले हामीलाई दिव्य गाईहरूको समूह र सुन्दर घोडा पनि प्रदान गरून्। त्यसै गरी हामीलाई पुरुषार्थी पुत्रहरू र सबैको हित गर्ने धन प्रदान गरून्। देवरूपी अश्वले हामीलाई पापबाट पनि मुक्त गरून्।

**ॐ यथेमाँ वाचङ्कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्याᳪशूद्राय चार्य्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयम्मे कामः समृध्यतामुपमादो नमतु ।। (शु.य. २६.२)**

अहं ब्राह्मणक्षत्रियादिभिः आत्मीयजनैः परजनैश्च सर्वैः मनुष्यैः सह सत्यरूपाम् इमां कल्याणीं वाचं वदामि। ततोऽहं देवानां प्रियो भविष्यामि। इह लोके दक्षिणाया दाता अहं देवानां प्रियो भूयासम्। मम धनपुत्रादिलाभो रूपकामश्च सफलो भवतु।

म आफन्त वा पराइ सम्पूर्ण मानिससँग कल्याणकारी, सत्य अनि मिठो वचन बोल्छु। त्यसपछि म देवताहरूको प्रिय हुने छु। यस लोकमा दक्षिणा दिने भएको म देवताहरूको प्रिय बनूँ र मेरो धनपुत्रादि प्राप्त गर्ने इच्छा सफल होस्।

**ॐ उच्चाते जातमन्धसो दिवि सद्भूम्याददे । उग्रᳫशर्म महि श्रवः ।। (शु.य. २६.१६)**

हुताहुतिः आदौ दिवि गच्छति, ततोऽन्तरिक्षे जलरूपेण, ततो भूमौ अन्नरूपेण, ततो पुरुषेषु वीर्यरूपेण, ततो योनौ नररूपेण आगत्य तं नरं धनयशोभ्यां सुखिनं करोति।

होम गरिएको आहुति प्रथमतः द्युलोकमा पुग्छ। त्यसपछि वृष्टिका रूपमा अन्तरिक्षमा र अन्नका रूपमा पृथिवीमा आउँछ। त्यसै गरी वीर्यका रूपमा

पुरुषमा र मान्छेका रूपमा स्त्रीयोनिमा प्राप्त हुन्छ। यसरी प्राप्त व्यक्तिलाई धन र कीर्तिद्वारा सुख प्रदान गर्छ।

**ॐ सञ्चेद्ध्यस्वाग्ने प्र च बोधयैनमुच्च तिष्ठ महते सौभगाय । मा च रिषदुपसत्ता तेऽअग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये ।। (शु.य. २७.२)**

हे अग्ने ! त्वं प्रज्वलितो भव, एनं यजमानं प्रबोधय, ऐश्वर्यं दातुं प्रयत्नं कुरु, तव सेवको यजमानो मा नश्यतु। ऋत्विग्यजमानाः यशस्विनो भवन्तु। अयज्वानो यशस्विनो मा भवन्तु।

हे अग्नि ! तिमी प्रज्वलित बन, यजमानलाई जागृत गराऊ, ऐश्वर्य प्रदान गर्ने प्रयत्न गर, तिम्रा उपासक यजमानको कहिल्यै हानि नहोस्, ऋत्विक् र यजमानहरू यशस्वी बनून्, पुण्य कर्म नगर्ने मानिसहरू यशस्वी नबनून्।

**ॐ त्वामग्ने वृणते ब्राह्मणाऽइमे शिवोऽअग्ने संवरणे भवानः । सपत्नहा नोऽअभिमातिजिच्च स्वे गये जागृह्यप्रयुच्छन् ।। (शु.य. २७.३)**

हे अग्ने ! इमे ऋत्विजः त्वां वृण्वन्ति। अस्मिन् संवरणे त्वं कल्याणकारी भव, अस्माकं शत्रूणां हन्ता भव, हतावशिष्टानां च शत्रूणां जेता भव। त्वम् अप्रमादी सन् स्वगृहे सततं प्रज्वलितो भव।

हे अग्नि ! यज्ञका लागि यी ऋत्विक् तिमीलाई वरण गर्छन्। तिमी शान्त बन। हाम्रा शत्रुहरूको नाश गर र अवशिष्ट शत्रुमाथि विजय प्राप्त गर्न सक्ने बन। प्रमादले रहित भई तिमी यज्ञगृहमा निरन्तर प्रज्वलित बन।

**ॐ केतुङ्कृण्वन्नकेतवे पेशो मर्याऽअपेशसे । समुषद्भिरजायथाः ।। (शु.य. २९.३७)**

हे अग्ने ! त्वम् अज्ञानिभ्यो मनुष्येभ्यो ज्ञानं प्रददन् कुरूपान् जनान् सुरूपान् विदधन् अग्निहोत्रादिकर्मकृद्भिः ऋत्विग्यजमानैश्च उत्पन्नोऽसि।

हे अग्ने ! तिमी अज्ञानी मनुष्यलाई ज्ञान दिँदै र कुरूप व्यक्तिलाई रूपवान् तुल्याउँदै अग्निहोत्रजस्ता पुण्य कर्म गर्ने होता र यजमानद्वारा उत्पन्न भएका हौ।

**ॐ तीव्रान्घोषान्क्रृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः । अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूँ१।।रनपव्ययन्तः ।। (शु.य. २९.४४)**

अश्वारुढाः सैनिकाः जय जयेतिशब्दान् कुर्वन्ति। अश्वाश्च रथैः सह गच्छन्तः सन्तः शब्दान् विधाय खुरैः रिपून् घ्नन्ति।

घोडामा चढेका सैनिकहरू जय जय भन्ने शब्द निकाल्छन्। रथ तान्दै गरेका घोडाहरू पनि आक्रामक भई शब्द निकाल्दै आफ्ना खुरद्वारा शत्रुहरू समाप्त पार्छन्।

**ॐ रथवाहण ँ हविरस्य नाम यत्रायुधं निहितमस्य वर्म । तत्रा रथमुप शग्म ँ सदेम विश्वाहा वय ँ सुमनस्यमानाः ।। (शु.य. २९.४५)**

अस्य रथस्य नाम रथवाहणं हविर्धानं वा भवति, यतो हि अत्र यज्ञस्य हविः स्थाप्यते, यत्र योद्धुः कवचम् आयुधञ्च स्थापितं वर्तते, तादृशं सुखकरं रथम् अधितिष्ठामः, प्रसन्ना वयम्।

यो रथको नाम रथवाहण वा हविर्धान हो किनभने जुन रथमा यज्ञको हवि राखिन्छ, जसमा योद्धाको कवच र शस्त्र राखिएको हुन्छ, यस्तो सुखप्रद रथमा प्रसन्न भएका हामीहरू अधिष्ठित हुन्छौँ।

**ॐ ऋजीते परिवृङ्धिनोऽश्मा भवतु नस्तनूः । सोमोऽअधिब्रवीतु नोऽदितिः शर्म यच्छतु ।। (शु.य. २९.४९)**

हे ऋजुगामिन् इषो ! अस्मान् मा प्रहर। अस्माकं शरीरं पाषाणतुल्यं दृढं भवतु। सोमोऽस्मान् प्रति अधिकं वदतु। अदितिः देवमाता अस्मभ्यं सुखं ददातु।

सरलगति भएका हे बाण ! हामीमाथि प्रहार नगर। हाम्रो शरीर ढुङ्गाजस्तै दृढ बनोस्। सोमले हाम्रो विषयमा धेरै बोलून्। देवमाता अदितिले हामीलाई सुख दिऊन्।

**ॐ आमूरज प्रत्यावर्तयेमाः केतुमद्दुन्दुभिर्वावदीति । समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ।। (शु.य. २९.५७)**

हे इन्द्र ! अमूः शत्रुसेनाः त्वं परिक्षिप, अग्रे वर्धमानाः इमाः शत्रुसेनाः दुन्दुभिनादेन विजयध्वनिं कुर्वन्त्यः सन्ति। अत इमाः प्रत्यावर्तय। अस्माकं रथस्थाः सेनाः युद्धे जयन्तु।

हे इन्द्र ! यी शत्रुसेनाहरूलाई तिमी पराजित गर। अघि बढिरहेका यी शत्रुसेनाहरू माङ्गलिक बाजाद्वारा विजयघोष गरिरहेका छन्। त्यसैले यिनीहरूलाई फर्काऊ। रथमा बसेका हाम्रा सेनाहरूले युद्धमा विजय प्राप्त गरून्।

**ॐ विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्नऽआसुव ।। (शु.य. ३०.३)**

हे सवितृदेव ! संसारेऽस्मिन् यानि पापानि सन्ति, तानि सर्वाणि अपाकरोतु। यानि च कल्याणानि सन्ति, अस्मान् तानि प्रापयतु।

हे सूर्यदेव ! संसारका सम्पूर्ण पापकर्मबाट हामीलाई टाढै राख्नुहोस्। जे जति पुण्यकर्महरू छन्, तिनमा प्रवृत्त गराउनुहोस्।

**ॐ ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्याᳫं शूद्रोऽअजायत ।। (शु.य. ३१.११)**

अध्ययनाध्यापनादिषु कर्मसु प्रवृत्ता ब्राह्मणाः परमात्मनो मुखस्थानीयाः सन्ति। तथैव रक्षाकर्मनिरता बाहुवद् बलशालिनो क्षत्रियास्तस्य बाहुस्थानीयाः, व्यापारादिव्यवसायेषु कुशला वैश्या ऊरूस्थानीयाः, पादवत् निरभिमानिनः सेवायां साधवश्च शूद्राश्चरणस्थानीयाः विद्यन्ते।

संसारका सम्पूर्ण मानिसहरू परमात्माकै अंश हुन्। पढ्नेपढाउनेलगायतका कर्म गर्ने ब्राह्मणहरू परमात्माका मुखस्थानीय हुन्। पाखुराजस्तै बलशाली भई राष्ट्रको रक्षा गर्ने रक्षकहरू परमात्माका भुजास्थानीय हुन् भने व्यापार, व्यवसाय गर्ने उद्यमीहरू जङ्घास्थानीय हुन्। त्यसै गरी पाउले झैं कुनै घमन्डको भाव नराखी सेवा गर्ने सेवकहरू परमात्माका चरणस्थानीय हुन्।

**ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।। (शु.य. ३१.१२)**

परब्रह्मणो मनसः चन्द्रमा जातः, नेत्राभ्यां सूर्योऽजायत, कर्णाभ्याम् वायुः प्राणाश्च अजायन्त, मुखाद् अग्निरजायत।

परब्रह्म परमात्माको मनबाट चन्द्रमा, आँखाबाट सूर्य, कानबाट वायु र प्राण अनि मुखबाट अग्नि प्रकट भए।

**ॐ तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः । तदेव शुक्रं तद्ब्रह्म ताऽआपः स प्रजापतिः ।। (शु.य. ३२.१)**

तत् कारणं ब्रह्मैव अग्निः, तदेव वायुः, तदेव चन्द्रमा, तदेव शब्दब्रह्म, तदेव जलम्, तदेव प्रजापतिश्चास्ति।

त्यही सर्वसमर्थ ब्रह्म नै अग्नि हो; त्यही सूर्य हो; त्यही वायु, त्यही चन्द्रमा, त्यही वेदरूप शब्दब्रह्म हो। त्यही जल र त्यही प्रजापति पनि हो।

**ॐ यां मेधां देवगणाः पितरश्चोपासते । तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ।। (शु.य. ३२.१४)**

हे अग्ने ! देवगणाः पितरश्च यां मेधां पूजयन्ति, सा मेधा मयि अस्तु, तदर्थं सुहुतमस्तु।

हे अग्निदेव ! देवगण र पितृगणले जुन मेधाशक्तिलाई सम्मान गर्छन्, त्यस्तो मेधा अर्थात् बुद्धि ममा रहोस्। त्यसका लागि यो आहुति समर्पित छ।

**ॐ मेधाम्मे वरुणो ददातु मेधामग्निः प्रजापतिः । मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ।। (शु.य. ३२.१५)**

वरुणो मह्यं मेधां ददातु, प्रजापतिः अग्निश्च मह्यं मेधां ददातु, इन्द्रो वायुश्च मह्यं मेधां ददातु, धाता च मह्यं मेधां ददातु ।

वरुण, प्रजापति, अग्नि, इन्द्र, वायु र धाताले मेरा लागि मेधाशक्ति प्रदान गरून् ।

**ॐ इदम्मे ब्रह्म च क्षत्रञ्चोभे श्रियमश्नुताम्। मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा।। (शु.य. ३२.१६)**

ब्राह्मणाः क्षत्रियाश्च मदीयां मेधारूपां श्रियं स्वीकुर्वन्तु। देवा उत्तमां श्रियं मयि स्थापयन्तु। तादृश्यै श्रियै सुहुतमस्तु।

ब्राह्मण र क्षत्रिय दुबैले मेरा मेधारूपी ऐश्वर्यलाई ग्रहण गरून्। देवताहरूले ममा उत्कृष्ट ऐश्वर्य स्थापित गरून्, त्यस्तो श्रीका लागि यो आहुति अर्पण गर्छु।

**ॐअग्नेशर्द्धमहतेसौभगायतवद्युम्नान्युत्तमानिसन्तु।सञ्जास्पत्यꣳसुयममाकृणुष्व शत्रूयतामभितिष्ठा महाꣳसि ।। (शु.य. ३३.१२)**

हे अग्ने ! महते सौभाग्याय त्वं समर्थो भव, हविर्लक्षणानि उत्तमानि अन्नानि तव सन्तु। यजमानदम्पती सुनियमान्वितौ, जितेन्द्रियौ, परस्परबद्धरागौ भवताम्। शत्रुत्वमिच्छतो जनान् पराजयस्व।

हे अग्नि ! महान् समृद्धिका लागि तिमी प्रभावशाली होऊ, यज्ञका लागि योग्य उत्तम अन्नहरू तिम्रा होऊन्। यजमानका पति–पत्नीले संयमपूर्वक जितेन्द्रिय भई परस्परमा प्रेम गरून्। वैरभाव राख्नेलाई तिमी पराजित गर।

**ॐ तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततꣳसञ्जभार । यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ।। (शु.य. ३३.३७)**

सूर्ये महद् देवत्वं वर्तते। यः स्वांशून् विस्तृणोति, संहरते च। सः सन्ध्याकाले पीतवर्णान् अंशून् आकाशमण्डलाद् विस्तारयति, रात्रौ तमसा सर्वं वस्तु आच्छादयति।

सूर्यदेवको ऐश्वर्य महान् छ जसले आफ्ना किरणलाई स्वयम् विस्तार गर्छन् र आफैँले संहार पनि गर्छन्। सन्ध्याकालमा आकाश मण्डलबाट समुज्ज्वल पहेँला किरणद्वारा पृथिवीलाई व्याप्त गर्छन् अनि रातमा अन्धकारद्वारा समस्त वस्तुलाई ढाक्छन्।

**ॐ इन्द्रवायू सुसन्दृशा सुहवेह हवामहे । यथा नः सर्वऽइज्जनोऽनमीवः सङ्गमे सुमनाऽअसत् ।। (शु.य. ३३.८६)**

वयम् अस्मिन् यज्ञे प्रेक्षणीयौ तौ इन्द्रवायू आह्वयामः, ययोरागमनेन अस्माकं पुत्रपौत्रादयो व्याधिरहिताः प्रसन्नचित्ताश्च भवन्ति।

हामीहरू यस यज्ञमा दर्शनीय ती इन्द्र र वायुलाई आवाहन गर्छौं जसको आगमनले हाम्रा पुत्रपौत्रादि नीरोगी र प्रसन्न हुनेछन्।

**ॐ दिवि पृष्टोऽअरोचताग्निर्वैश्वानरो बृहन् । क्ष्मया वृधानऽओजसा चनोहितो ज्योतिषा बाधते तमः ।। (शु.य. ३३.९२)**

सर्वेषां हितकारी महान् अग्निः द्युलोके आदित्यरूपेण विराजते। पृथिव्यां वर्णाश्रमिभिः मनुष्यैर्दत्तेन हविषा वर्धमानः सन् अन्ननिष्पादको भूत्वा अयं लोकहिताय अन्धकारं नाशयति।

सबैका हितकारी भएका महान् अग्नि द्युलोकमा सूर्यका रूपमा सुशोभित छन् भने पृथिवीलोकमा वर्णाश्रमी मनुष्यहरूले दिएको हविद्वारा उत्कर्षमा पुगेर प्रचुर अन्नको सम्पादन गर्दै लोकहितका लागि अन्धकारलाई हटाउने काम गर्छन्।

**ॐ यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवैति । दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ।। (शु.य. ३४.१)**

यन्मनो जाग्रदवस्थायां दूरम् उद्गच्छति। तदेव मनः सुषुप्तावस्थायामपि दूरं गच्छति, पुनरागच्छति च। प्रकाशरूपाणां चक्षुःश्रोत्रादीनाम् इन्द्रियाणाम् एकमेव ज्योतिःप्रवर्तकं तादृशं मे मनः शान्तसङ्कल्पमस्तु।

जुन मन जाग्रत् अवस्थामा टाढा टाढासम्म पुग्ने काम गर्छ, त्यही मन सुषुप्तावस्थामा पनि टाढासम्म पुग्छ र पुनः फर्केर आई लीन हुन्छ। आँखा, कानजस्ता इन्द्रियहरूलाई प्रकाशित एवम् उद्दीप्त गराउने मेरो मनले सधैँ कल्याणकारी सङ्कल्प गरोस्।

**ॐ येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः । यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ।। (शु.य. ३४.२)**

कर्मवन्तो बुद्धिमन्तो धीरपुरुषा येन मनसा यज्ञकर्माणि कुर्वन्ति, प्राणिनाम् अन्तरिन्द्रियरूपेण मध्ये स्थितं तादृशं मे मनः शुभसङ्कल्पेन युक्तं भवतु।

कर्मठ, बुद्धिमान् र धीर मनुष्यहरू जुन मनद्वारा यज्ञयागादि पुण्यकर्महरू गर्छन्, सम्पूर्ण प्राणीहरूको भित्री इन्द्रियको रूपमा बस्ने त्यस्तो मेरो मन शुभसङ्कल्पले युक्त बनोस्।

**ॐ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतम्प्रजासु । यस्मान्नऽऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ।। (शु.य. ३४.३)**

मन एव विशिष्टज्ञानजनकं प्रज्ञानं, मन एव सामान्यविशेषज्ञानजनकं चित्तम्, मन एव धैर्यरूपम्, मन एव सर्वेन्द्रियाणां प्रकाशकम्, मन एव मोक्षरूपम् अमृतञ्च विद्यते। यन्मनो विना जनाः किमपि कर्म कर्तुं नैव शक्नुवन्ति, तादृशं मे मनः शुभसङ्कल्पम् अस्तु।

मन नै विशेष ज्ञान गराउने प्रज्ञा हो। मन नै सामान्य र विशेष छुट्याउन सक्ने चित्तस्वरूप छ। धैर्य पनि मनले नै गराउँछ। सम्पूर्ण इन्द्रियको प्रकाशक र प्रवर्तक मन नै हो। मुक्तिको साधन पनि मन नै बन्न पुग्छ। जसको सहाराविना कुनै काम गर्न सकिँदैन, त्यस्तो मेरो मनले सधैँ कल्याणकारी सङ्कल्प गरोस्।

**ॐ येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् । येन यज्ञस्तायते सप्त होता तन्मे मनः शिवसङ्कल्पमस्तु ।। (शु.य. ३४.४)**

यत् शाश्वतं मन एव भूतभविष्यद्वर्तमानसम्बद्धानां त्रैकालिकवस्तूनाम् आधाररूपं वर्तते, येनैव अग्निष्टोमादयः सप्त होतृयज्ञाः सम्पाद्यन्ते, तादृशं मे मनः सत्यसङ्कल्पम् अस्तु।

जुन शाश्वत मन नै भूत, भविष्य र वर्तमानसँग सम्बन्धित त्रैकालिक वस्तुहरूको आधार हो, जसद्वारा अग्निष्टोमादि होमयज्ञहरूको सम्पादन गर्न सकिन्छ, त्यस्तो मेरो मन सत्य सङ्कल्पकर्ता बनोस्।

**ॐ यस्मिन्नृचः साम यजूꣳषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः । यस्मिँश्चित्तꣳसर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ।। (शु.य. ३४.५)**

यथा रथचक्रस्य नाभौ मध्यमे काष्ठे सर्वेऽवयवाः लग्ना भवन्ति, तद्वदेव यस्मिन् मनसि ऋचो यजूंषि सामानि च प्रतिष्ठितानि सन्ति। सर्वेषां प्रजानां ज्ञानं मनसि एव निहितं वर्तते, तादृशं मे मनः सत्यसङ्कल्पम् अस्तु।

जसरी रथचक्रको नाभिमा अर्थात् बिचको काठमा रथका सबै अवयव जोडिएका हुन्छन्, त्यसरी नै ऋग्वेद, यजुर्वेद र सामवेद पनि मनमा रहेका हुन्छन्। जुन मनमा सम्पूर्ण ज्ञान निहित हुन्छ, त्यस्तो मेरो मन सत्यसङ्कल्पले युक्त बनोस्।

**ॐ सुषारथिरश्वानिव यन्मनुष्यान् नेनीयते भीशुभिर्वाजिनऽइव । हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ।। (शु.य. ३४.६)**

सुसारथिः यथा वेगवतोऽपि अश्वान् वशीकृत्य इतस्ततो नयति नियच्छति च, तथैव यन्मनः प्राणिन इतस्ततो नयति, हृत्प्रदेशे स्थितं जरारहितं तादृशं वेगवद् मे मनः शिवसङ्कल्पम् अस्तु।

जसरी कुशल सारथिले वेगवान् घोडाहरूलाई आफ्नो अधीनमा राख्छ, त्यसै गरी मनले प्राणीहरूलाई आफ्नो वशमा राखेर हिँडाइरहेको हुन्छ। हृदयमा रहेको, कहिल्यै बुढो नहुने, अत्यन्त वेगवान् त्यस्तो मेरो मनले सधैँ कल्याणकारी सङ्कल्प गरोस्।

**ॐ भगऽएव भगवाँ२।।ऽअस्तु देवास्तेन वयं भगवन्तः स्याम । तन्त्वा भग सर्वऽइज्जोहवीति स नो भग पुरऽएता भवेह ।। (शु.य. ३४.३८)**

हे देवाः ! भग एव धनवान् अस्तु, तेन दत्तेन धनेन एव वयं धनवन्तो भवेम। इष्टसिद्धये त्वामेव जन आह्वयति, त्वमेव अग्रेसरो भूत्वा अस्माकं सर्वाणि कार्याणि साधय।

हे देवताहरू ! भग देवता नै धनवान् होऊन्, उनैद्वारा प्रदत्त धनले हामी पनि धनवान् होऔँ। इष्टसिद्धिका लागि हजुरलाई नै मनुष्यहरू आवाहन गर्छन्। हजुर नै अग्रगामी भएर हाम्रो कार्य सिद्ध गर्नुहोस्।

**ॐ अपेतो यन्तु पणयो सुम्ना देवपीयवः । अस्य लोकः सुतावतः । द्युभिरहोभिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मै ।। (शु.य. ३५.१)**

दुःखप्रदायका देवद्विषोऽसुरा इतोऽपगच्छन्तु, सोमाभिषवं कृतवतो यजमानस्य इदं स्थानं वर्तते। ऋतुभिः, दिवसैः, रात्रिभिश्च युक्तं स्थानं यमो यजमानाय ददातु।

दुःख प्रदान गर्ने, देवताहरूका शत्रु असुरहरू यहाँबाट भागून्। यो स्थान सोमयाग गर्ने यजमानको हो। ऋतु, दिन र रात्रिले युक्त यो स्थान यमले यजमानलाई प्रदान गरून्।

**ॐ कल्पन्तान्ते दिशस्तुभ्यमापः शिवतमास्तुभ्यं भवन्तु सिन्धवः । अन्तरिक्षꣳ शिवं तुभ्यं कल्पन्तान्ते दिशः सर्वाः ।। (शु.य. ३५.९)**

दिशः त्वदर्थम् अनुकूला भवन्तु, आपः कल्याणकारिण्यो भवन्तु, समुद्राः कल्याणकारिणो भवन्तु, अन्तरिक्षं कल्याणकारि भवतु, सर्वाः दिशः त्वदर्थं मङ्गलयुक्ता भवन्तु।

दिशाहरू तिम्रा लागि अनुकूल बनून्। तिम्रा निम्ति जल, समुद्र, आकाश सबै कल्याणकारी बनून्। पूर्वादि सबै दिशाहरू तिम्रा लागि मङ्गलकारी बनून्।

**ॐ सुमित्रिया नऽआपऽओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयन्द्विष्मः ।। (शु.य. ३५.१२)**

आपः ओषधयश्च अस्माकं कृते मित्रवत् कल्याणकारिण्यो भवन्तु। यः अस्मान् द्वेष्टि, यं च वयं द्विष्मः, तान् प्रति आपः ओषधयश्च शत्रुवद् अमङ्गलकारिणः सन्तु।

जल र औषधीय वनस्पतिहरू हाम्रा लागि मित्र झैं कल्याणकारी बनून्। जसले हामीप्रति द्वेषभाव राख्छन् र जसमाथि हामी द्वेषभाव राख्छौं, तिनीहरूका लागि भने जल र औषधी शत्रु झैं अमङ्गलकारी बनून्।

**ॐ वह वपां जातवेदः पितृभ्यो यत्रैनान्वेत्थ निहितान्पराके । मेदसः कुल्याऽउप तान्स्रवन्तु सत्याऽएषामाशिषः सन्नमन्ताᳬस्वाहा ।। (शु.य. ३५.२०)**

हे सर्वविद् अग्ने ! दूरेऽपि स्थाने स्थितान् पितृगणान् त्वं जानासि। अतस्तेभ्यो हविर्भागं त्वं प्राप्नुहि। तेषां पितृणाम् आशिषो वयं प्राप्नुयाम।

सम्पूर्ण कुरा जान्ने हे अग्नि ! अत्यन्त टाढा रहेका पितृहरूलाई तिमी जान्दछौ, त्यसैले ती पितृहरूका लागि हविको भाग तिमी प्राप्त गर। हामीलाई ती पितृहरूको आशीर्वाद प्राप्त होस्।

**ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः । अप नः शोशुचदघम् ।। (शु.य. ३५.२१)**

हे पृथिवि ! त्वं कण्टकादिरहिता, निवासयोग्या, सुखदा च भव। विस्तृता त्वम् अस्मभ्यं शरणं देहि। इदं जलम् अस्माकं पापं दहतु।

हे पृथिवी ! तिमी हाम्रा लागि काँढा आदिले रहित, सुखपूर्वक निवास गर्न योग्य होऊ। विशाल भएर फैलिएकी तिमी हाम्रा लागि शरण देऊ। यो जलले हाम्रो पाप नाश गरोस्।

**ॐ ऋचँवाचम्प्रपद्ये मनो यजुः प्रपद्ये साम प्राणम्प्रपद्ये चक्षुः श्रोत्रम्प्रपद्ये । वागोजः सहौजो मयि प्राणापानौ ।। (शु.य. ३६.१)**

ऋग्रूपां वाचं शरणं प्रपद्ये, मनोरूपं यजुः प्रपद्ये, प्राणरूपं साम प्रपद्ये, चक्षुरिन्द्रियं श्रोत्रेन्द्रियं च प्रपद्ये; वाणी, मानसं बलं, शारीरं बलम्, प्राणापानौ च मयि सन्तु।

ऋग्वेदरूपी वाणीको शरणमा पर्छु। मनरूप यजुर्वेदको शरणमा पर्छु। प्राणरूप सामवेदको शरणमा पर्छु। चक्षुरिन्द्रिय र श्रोत्रेन्द्रियको शरणमा पर्छु। वाणी, मानसिक बल, प्राणवायु र अपान वायु ममा रहून्।

**ॐ यन्मे छिद्रञ्चक्षुषो हृदयस्य मनसो वातितृणं बृहस्पतिर्मे तद्दधातु । शन्नो भवतु भुवनस्य यस्पतिः ।। (शु.य. ३६.२)**

मम चक्षुरिन्द्रियस्य यत् छिद्रं, हृदयस्य यत् छिद्रं, मनसो यत् छिद्रम् अर्थात् चक्षुर्बुद्धिमनसां यत् व्याकुलत्वं जातमस्ति, देवगुरुः बृहस्पतिस्तच्छिद्रं निवर्तयतु। यो भुवनस्य अधिपतिः विद्यते, स अस्माकं सुखरूपो भवतु।

मेरो चक्षुरिन्द्रिय, हृदय र मनमा जुन कमीकमजोरी छ, त्यसलाई देवगुरु बृहस्पतिले हटाइदिऊन्। सम्पूर्ण संसारका मालिक परमात्माले हामीलाई सुख प्रदान गरून्।

**ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो योनः प्रचोदयात् ।। (शु.य. ३६.३)**

सर्वैः प्रार्थनीयं, सर्वपापानां भर्जनसमर्थं, द्योतनात्मकस्य प्रेरकस्य सवितुर्देवस्य त्रैलोक्यं तेजो वयं ध्यायामः, यः सविता अस्माकं बुद्धिं सत्कर्मणि प्रेरयति।

सबैले प्रार्थना गरिने, समस्त पापलाई नाश गर्न समर्थ, सम्पूर्ण सांसारिक प्राणीलाई प्रेरित गर्ने सूर्यदेवको तीनै लोकमा व्याप्त तेजको हामी ध्यान गर्छौं जुन सविता देवले हाम्रो बुद्धिलाई पुण्यकर्ममा संलग्न गराउँछन्।

**ॐ इन्द्रो विश्वस्य राजति । शन्नोऽअस्तु द्विपदे शञ्चतुष्पदे ।। (शु.य. ३६.८)**

विश्वस्य जगतः प्रदीपकः परमात्मा अस्माकं पुत्रादीनां गवादिपशूनाञ्च सुखरूपोऽस्तु।

समस्त चराचर जगत्का मालिक परमात्माले हाम्रा पुत्रादि सन्तति र गाई, घोडा आदि चौपायाहरूलाई सुख प्रदान गरून्।

**ॐ शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा । शन्नऽइन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः ।। (शु.य. ३६.९)**

मित्रः, वरुणः, अर्यमा, इन्द्रः, बृहस्पतिः, विस्तीर्णपादक्रमो विष्णुश्च अस्माकं कृते सुखकराः भवन्तु ।

मित्रदेव (सूर्य), वरुण, अर्यमा, देवराज इन्द्र, वेदरक्षक बृहस्पति र तीनै लोक व्याप्त गर्ने चरण भएका सर्वव्यापी विष्णु हाम्रा निम्ति सुखकारक होऊन्।

**ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये । शँयोरभिस्रवन्तु नः ।। (शु.य. ३६.१२)**

दीप्यमाना आपोऽस्माकम् अभीष्टाय स्नानाय पानाय च सुखकराः भवन्तु। ता आपोऽस्माकं भयरोगादीनां नाशं कुर्वन्तु।

निर्मल जल हाम्रो स्नान र पानका लागि हितकर होस्। त्यसै गरी भय, रोग आदिको नाश गर्न पनि उक्त जल समर्थ होस्।

**ॐ द्यौः शान्तिरन्तरिक्ष꣡ꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व꣡ꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ।। (शु.य. ३६.१७)**

द्युलोके, अन्तरिक्षे, पृथिव्यां, जलेषु, ओषधीषु, वनस्पतिषु, सर्वदेवेषु, वेदविद्यासु, सर्ववस्तुषु च या शान्तिर्वर्तते, सा मयि अस्तु। अहं शान्तस्वरूपो भवेयम् इति भावः।

द्युलोकमा, अन्तरिक्षलोकमा, पृथिवीलोकमा, जलमा, औषधीय पदार्थमा, वनस्पतिमा, समस्त देवताहरूमा, वेदविद्यामा र सर्वत्र विद्यमान जुन शान्ति छ, त्यो ममा प्राप्त होस् र म शान्त बनूँ।

**ॐ दृते दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् । मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे । मित्रस्य चक्षुषा समीक्षामहे ।। (शु.य. ३६.१८)**

हे देव ! वृद्धावस्थया विदीर्णशरीरमपि मां त्वं दृढीकुरु। सर्वे प्राणिनो मां मित्रस्य चक्षुषा सम्यक् पश्यन्तु। अहमपि सर्वान् प्राणिनो मैत्र्या दृष्ट्या पश्यामि। वयं सर्वान् परस्परं मित्रवत् पश्यामः।

हे देवता ! वृद्धावस्थाले जर्जर शरीर भएको भए पनि मलाई सुदृढ बनाउनुहोस्। समस्त प्राणीले मलाई मित्रको नजरले हेरून्। म सबैको प्रिय बनूँ, सबैलाई मित्रको नजरले हेरूँ। हामी सबै परस्पर मित्रका नजरले हेर्छौं।

**ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतञ्जीवेम शरदः शत शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात् ।। (शु.य. ३६.२४)**

देवानां प्रियः सूर्यः जगतां चक्षुःरूपो वर्तते। यः पूर्वस्यां दिशि उदेति, तस्य प्रसादाद् वयं शतवर्षपर्यन्तं पश्येम, जीवेम, श्रृणुयाम, प्रब्रवाम च। एवमेव शतवर्षपर्यन्तं दैन्यं न प्राप्नुयाम।

देवताहरूका प्रिय, चराचर जगत्-का नेत्ररूप जुन सूर्य पूर्व दिशामा उदाउँछन्, उनकै अनुग्रहद्वारा हामीहरू सयौँ वर्षसम्म देख्न सकौँ, बाँच्न सकौं, सुन्न सकौं, बोल्न सकौँ। त्यसै गरी हामीलाई सयौँ वर्षसम्म दुःख आई नपरोस्।

**ॐ क्षत्रस्य त्वा परस्पाय ब्रह्मणस्तन्वं पाहि । विशस्त्वा धर्मणा वयमनुक्रामाम सुविताय नव्यसे ।। (शु.य. ३८.१९)**

भो यज्ञ ! त्वं ब्राह्मणानां शरीरं रक्ष, क्षत्रियस्य पालनाय वयं त्वाम् अनुगच्छाम। नवीनकर्मसिद्ध्यर्थं प्रजानां पालनाय च वयं त्वाम् अनुगच्छाम।

हे यज्ञ ! तिमी ब्राह्मण शरीरको रक्षा गर। क्षत्रियहरूको रक्षाका लागि हामी तिम्रो अनुष्ठान गर्छौं। नवीन कार्यको सिद्धि र प्रजाहरूको पालनका लागि पनि हामी तिम्रो अनुसरण गर्छौं।

**ॐ चतुःस्रक्तिर्नाभिर्ऋतस्य सप्रथाः स नो विश्वायुः सप्रथाः स नः सर्वायुः । अपद्वेषोऽअपह्वरो ऽन्यव्रतस्य सश्चिम ।। (शु.य. ३८.२०)**

चतस्रो दिशो यज्ञस्य चतुष्कोणरूपाः सन्ति, स यज्ञः सत्यस्य नाभिरूपो विस्तारयुक्तश्च वर्तते। जगत आयुर्दाता स अस्माकं पूर्णायुप्रदोऽस्तु। भो यज्ञ ! अस्माकं द्वेषं नाशयतु, जन्ममरणलक्षणं चक्रं निवारयतु। परमात्मानम् उपास्य वयं सायुज्यं प्राप्नुम।

पूर्वादि चार दिशा नै यज्ञका चार कोण हुन्। त्यो यज्ञ नै सत्यको मूल आधार र विस्तृत रूप हो। जगत्का आयुदाता यज्ञपुरुषले हामीलाई पूर्ण आयु प्रदान गरून्। हे यज्ञ ! हामीमा निहित द्वेषभावको नाश होस्, जन्म र मृत्युको चक्रबाट पार गराइदिनुहोस्। परमात्माको उपासना गरेर हामी सायुज्य मुक्तिलाई प्राप्त गर्न सकौं।

**ॐ मनसः काममाकूतिं वाचः सत्यमशीय । पशूनाꣳरूपमन्नस्य रसो यशः श्रीः श्रयताम् ।। (शु.य. ३९.४)**

अहं मनसः इच्छां प्रयत्नं च प्राप्नुयाम्, मम वाणी सत्यं वदतु। प्राणिनां शोभा, अन्नानां स्वादुत्वं, कीर्तिः, लक्ष्मीश्च मयि तिष्ठन्तु।

मनदेखि नै इच्छाशक्ति र प्रयत्न गर्ने प्रवृत्तिलाई मैले प्राप्त गरूँ। मेरो वाणीले सत्य बोलोस्। प्राणीहरूको रूप, अन्नको स्वाद, इज्जत र लक्ष्मी ममा रहून्।

**ॐ उग्रँल्लोहितेन मित्रꣳसौव्रत्येन रुद्रं दौर्व्रत्येनेन्द्रं प्रक्रीडेन मरुतो बलेन साध्यान्प्रमुदा । भवस्य कण्ठ्यꣳरुद्रस्यान्तः पाश्वर्यं महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत् ।। (शु.य. ३९.९)**

रक्तेन उग्रं देवं प्रीणामि। सुकर्मभिः मित्रं देवं, अशुभकर्मभिश्च रुद्रं देवं प्रसादयामि। प्रक्रीडनेन इन्द्रं, बलेन मरुतं, प्रहर्षेण साध्यान् देवान् च प्रीणामि। कण्ठस्थं मांसं भवस्य अस्तु, पार्श्वभागस्य मांसं रुद्रस्यास्तु, यकृत् महादेवस्यास्तु, स्थूलान्त्रं शर्वस्यास्तु, हृदयाच्छादकमन्त्रं पशुपतेर्देवस्यास्तु।

उग्रस्वरूप भएका देवलाई रगतद्वारा प्रसन्न बनाउँछु। शुभ कर्मद्वारा मित्रदेवलाई, अशुभ कर्मद्वारा रुद्रदेवलाई, उत्कृष्ट क्रीडाद्वारा इन्द्रलाई, बलद्वारा वायुलाई, हर्षद्वारा साध्यदेवलाई प्रसन्न बनाउँछु। कण्ठमा रहेको मांसभाग भवदेवको होस्। त्यस्तै पार्श्वभागको मांस रुद्रको, कलेजो महादेवको, ठुलो आन्द्रा शर्वको र हृदयावयव आन्द्रा पशुपतिको होस्।

**ॐ ईशावास्यमिदꣳसर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम् ।। (शु.य. ४०.१)**

इदं सर्वं प्रत्यक्षतो दृश्यमानं जगत् परमात्मना व्याप्तमस्ति। इदं मम इति भावं त्यक्त्वा भोगं कुरुत, धनादिकं भोग्यवस्तु कस्यापि न वर्तते, अत्र मम बुद्धिरेव अविद्या अस्ति। अत कस्यापि धने स्पृहां मा कुरु।

प्रत्यक्ष रूपमा देखिएको यो समस्त जगत् परमात्माद्वारा व्याप्त छ। यो सबै नश्वर वस्तुमा मेरो भन्ने भावलाई छोडेर त्यागपूर्वक भोग गर। धनादि भोग्य पदार्थ कसैको पनि हुँदैन। यो मेरो भन्ने भाव नै मूर्खता हो, त्यसैले कसैको धनमा लोभ नगर।

**ॐ कुर्वन्नेह कर्माणि जिजीविषेच्छतꣳसमाः । एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ।। (शु.य. ४०.२)**

इह लोके मुक्तिहेतुकानि पुण्यकर्माणि कुर्वन् मनुष्यः शतवर्षपर्यन्तं जीवितुम् इच्छेत्। अन्यथा मुक्तिर्नास्ति। एवं प्रकारेण जिजीविषति त्वयि अशुभानि कर्माणि न लिप्यन्ते। अतः सदा शास्त्रविहितं कर्म कुरु।

यस लोकमा मुक्तिदायक पुण्य कर्महरू गर्दै मनुष्यले सयौं वर्षसम्म बाँच्ने इच्छा गरोस्। यसभन्दा अरु उपायबाट मुक्ति प्राप्त हुँदैन। यस प्रकार बाँच्न चाहने तिमीमा अशुभ कर्महरू सम्बद्ध हुँदैनन्, त्यसैले सधैं शास्त्रले निर्देश गरेका कर्म गर।

**ॐ अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं विधेम ।। (शु.य. ४०.१६)**

हे अग्ने ! हे देव ! त्वं सर्वाणि कर्माणि जानासि, अतोऽस्मान् कर्मफलभोगाय शोभनेन धर्ममार्गेण प्रापय। अस्मत्तः कुटिलं वञ्चनात्मकं पापं नाशय। ततो विशुद्धा वयं तुभ्यं बहुशः नमस्कृत्वा परिचर्यां कुर्याम।

हे अग्निदेव ! हजुर सम्पूर्ण कर्मको रहस्यलाई जान्ने हुनुहुन्छ। त्यसैले हामीलाई आफ्नो कर्म अनुसारको फल भोग्नका निम्ति धर्मका माध्यमले लैजानुहोस्। हामीमा रहेका धोकारूपी कुटिल पापकर्मलाई नाश गरिदिनुहोस्। पाप नष्ट भएपश्चात् विशुद्ध भएका हामी बारम्बार नमस्कार गर्दै हजुरको सेवा गर्न सकौँ।

**ॐ हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । योऽसावादित्ये पुरुषः सोऽसावहम् ।। (शु.य. ४०.१७)**

ज्योतिर्मयेन पात्रेण सत्यस्याविनाशिनः पुरुषस्य स्वरूपमाच्छादितं वर्तते। यः पुरुषो ज्योतिर्मये आदित्यमण्डले वर्तते, सोऽहमेवास्मि।

ज्योतिर्मय पात्रद्वारा अविनाशी सत्यस्वरूप परमात्माको स्वरूप ढाकिएको छ। जुन पुरुष दिव्य आदित्यमण्डलमा विराजमान छ, त्यो ब्रह्मरूप पुरुष स्वयं म नै हुँ।